1622.49
1307.37
315.12

८

शुकसप्तति २३३

ॐश्रीगणेशायनमः नारायणंनमस्कृत्यनरंचैवनरोत्तमं।देवीसरस्वतींचैवततोजयमुदीरयेत्॥ ॥
ॐनमोभगवतेवासुदेवाय ॐनमःपितामहाय ॐनमःकृष्णद्वैपायनाय ॐनमःसर्वविनाय
केभ्यः लोमहर्षणपुत्रउग्रश्रवाःसौतिःपौराणिकोनैमिषारण्येशौनकस्यकुलपतेर्द्वादशवार्षिकेसत्रे।सुखा
सीनानभ्यगछद्ब्रह्मर्षीन्संशितव्रतान्।विनयावनतोभूत्वाकदाचित्सूतनंदनः।तमाश्रममनुप्राप्तंनैमिषा
रण्यवासिनाम्।चित्राःश्रोतुंकथास्तत्रपरिवव्रुस्तपस्विनः।अभिवाद्यमुनींस्तांस्तुसर्वानेवकृतांजलिः।अपृ
छत्सतपोवृद्धिंसद्भिश्चैवाभिपूजितः।अथतेषूपविष्टेषुसर्वेष्वेवतपस्विषु।निर्दिष्टमासनंभेजेविनयाल्लोम
हर्षणिः।सुखासीनंततस्तंतुविश्रांतमुपलक्ष्यच।अथापृछदृषिस्तत्रकश्चित्प्रस्तावयत्कथाः।कुतआगम्यते
सौतेक्वचायंविहृतस्त्वया।कालःकमलपत्राक्षशंसैतत्पृछतोमम।एवंपृष्टोब्रवीत्सम्यग्यथावल्लोमहर्षणिः॥
वाक्यंवचनसम्पन्नस्तेषांचचरिताश्रयं।तस्मिन्सदसिविस्तीर्णेमुनिनांभवितात्मनां॥ सौतिरुवाच ॥
जन्मेजयस्यराजर्षेःसर्प्पसत्रेमहात्मनः।समीपेपार्थिवेंद्रस्यसम्यक्पारीक्षितस्यच।कृष्णद्वैपायनप्रोक्ताःसुपु

एया विविधाः कथाः। कथिताश्चापि विधिवद्या वैशम्पायनेन वै। श्रुत्वाहं ता विचित्रार्था महाभारतसंश्रिताः। ब
हूनि संपरिक्रम्य तीर्थान्यायतनानि च। समन्तपंचकं नाम पुण्यं द्विजनिषेवितं। गतवानस्मि तं देशं युद्धं यत्राभवत्पु
रा। कुरूणां पाण्डवानां च सर्वेषां च महीक्षितां। दिदृक्षुरागतस्तस्मात्समीपं भवतामिह। आयुष्मन्तः सर्व एव ब्र
ह्मभूता हि मे मताः। अस्मिन्यज्ञे महाभागाः सूर्यपावकवर्च्चसः। कृताभिषेकाः शुचयः कृतजप्या हुताग्नयः। भवं
त आसते स्वस्था ब्रवीमि किमहं द्विजाः। पुराणसंश्रिताः पुण्याः कथाः धर्म्मार्थसंश्रिताः। इतिवृत्तं नरेन्द्राणामृषी-
णां च महात्मनां॥ ऋषय ऊचुः ॥ द्वैपायनेन यत्प्रोक्तं पुराणं परमर्षिणा। सुरैर्ब्रह्मर्षिभिश्चैव श्रुत्वा यद
भिपूजितं। तस्याख्यानवरिष्ठस्य विचित्रपदपर्व्वणः। सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च। भारतस्येतिहास
स्य पुण्यां ग्रंथार्थसंयुतां। संस्कारोपगतां ब्राह्मीं नानाशास्त्रोपबृंहितां। जन्मेजयस्य यां राज्ञो वैशंपायन उक्तवान्।
यथावत्स ऋषिस्तुष्ट्या सत्रे द्वैपायनाज्ञया। वेदैश्चतुर्भिः संयुक्तां व्यासस्याद्भुतकर्म्मणः। संहितां श्रोतुमिच्छामः पुण्यां
पापभयापहां॥ सौतिरुवाच ॥ आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतं। ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सना
तनं। असच्च सदसच्चैव यद्विश्वं सदसत्परं। परावराणां स्रष्टारं पुराणं परमव्ययं। मंगल्यं मंगलं विष्णुं वरेण्यमनघं

श्रुतिं।नमस्कृत्यहृषीकेशंचराचरगुरुंहरिं।महर्षेःपूजितस्येहसर्वलोकमहात्मनः।प्रवक्ष्यामिमतंकृत्स्नंव्यास
स्याद्भुतकर्म्मणः।आचख्युःकवयःकेचित्संप्रत्याचक्षतेपरे।आख्यास्यंतितथैवान्यइतिहासमिमंभुवि।इदंतुत्रि
षुलोकेषुमहज्ज्ञानंप्रतिष्ठितं।विस्तरैश्चसमासैश्चधार्यतेयद्द्विजातिभिः।अलंकृतंशुभैःशब्दैःसमयैर्दिव्यमानुषैः
।छंदोवृत्तैश्चविविधैरन्वितंविदुषांप्रियं।निःप्रभेस्मिन्निरालोकेसर्वतस्तमसावृते।बृहदंडमभूदेकंप्रजानांबीज
मव्ययं।युगस्यादौनिमित्तंतन्महद्दिव्यंप्रचक्षते।यस्मिन्संश्रूयतेसत्यंज्योतिर्ब्रह्मसनातनं।अद्भुतंचाप्यचिंत्यंच
सर्वत्रसमतांगतं।अव्यक्तंकारणंसूक्ष्मंयत्तत्सदसदात्मकं।यस्मात्पितामहोयज्ञेप्रभुरेकःप्रजापतिः।ब्रह्मा
सुरगुरुःस्थाणुर्म्मनुःकःपरमेष्ठ्यथ।प्राचेतसस्तथादक्षोब्रह्मपुत्राश्चसप्तवै।ततःप्रजानांपतयःप्राभवन्नेकविं
शतिः।पुरुषश्चाप्रमेयात्मायंसर्वेऋषयोविदुः।विश्वेदेवास्तथादित्यावसवोथाश्विनावपि।यक्षाःसाध्याःपिशा
चाश्चगुह्यकाःपितरस्तथा।ततःप्रसूताविद्वांसःशिष्टाब्रह्मर्षिसत्तमाः।राजर्षयश्चबहवःसर्वैःसमुदितागुणैः।आ
पोद्यौःपृथिवीवायुरंतरिक्षंदिशस्तथा।संवत्सरर्त्तवोमासाःपक्षाहोरात्रयःक्रमात्।यच्चान्यदपितत्सर्वंसंभूतंलो
कसाक्षिकं।यदिदंदृश्यतेकिंचिद्भूतंस्थावरजंगमं।पुनःसंक्षिप्यतेसर्वंजगत्प्राप्तेयुगक्षये।यथर्त्तावृतुलिंगानि

धुर्नीमल्लोकाधिष्ठात्रीदेवता २

नानारूपाणिपर्यये।दृश्यंतेतानितान्येवतथाभावायुगादिषु।एवमेतदनाद्यंतंभूतसंहारकारकं।अनादिनिध
नंलोकेचक्रंसंपरिवर्त्तते।त्रयस्त्रिंशत्सहस्राणित्रयस्त्रिंशच्छतानिच।त्रयस्त्रिंशच्चदेवानांसृष्टिःसंक्षेपलक्ष
णा।दिवःपुत्रोबृहद्भानुश्चक्षुरात्माविभावसुः।सवितासऋचीकोर्कोभानुराशावहोरविः।पुत्राविवस्वतःसर्वेम
ह्यस्तेषांतथावरः।देवभ्राट्तनयस्तस्यतस्मात्सुभ्राडितिस्मृतः।सुभ्राज
स्तुत्रयःपुत्राःप्रजावंतोबहुश्रुताः।दशज्योतिःशतज्योतिःसहस्रज्योतिरेवच।दशपुत्रसहस्राणिदशज्योतेर्महात्मनः।
ततोदशगुणाश्चान्येशतज्योतेरिहात्मजाः।भूयस्ततोदशगुणाःसहस्रज्योतिषःसुताः।तेभ्योयंकुरुवंशश्चयदू
नांभरतस्यच।ययातीक्ष्वाकुवंशश्चराजर्षीणांचसर्वशः।संभूताबहवोवंशाभूतसर्गाःसविस्तराः।भूतस्थानानिस
र्वाणिरहस्यंत्रिविधंचयत्।वेदायोगःसविज्ञानोधर्म्मोर्थःकामएवच।धर्म्मकामार्थयुक्तानिशास्त्राणिविविधानि
च।लोकयात्राविधानंचसंभूतंदृष्टवानृषिः।इतिहासाःसवैयाख्याःविविधाःश्रुतयोपिच।इहसर्वमनुक्रांतमुक्तंग्रं
थस्यलक्षणं।विस्तीर्यैतन्महज्ज्ञानमृषिःसंक्षिप्यचाब्रवीत्।इष्टंहिविदुषांलोकेसमासव्यासधारणं।मन्वादिभारतंके
चिदास्तीकादितथापरे।तथोपरिचराद्यन्येविप्राःसम्यगधीयते।विविधंसंहिताज्ञानंदीपयंतिमनीषिणः।व्याख्यातुंकु

शलाः केचिद्‌ग्रंथान्‌धारयितुं परे। तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनं। इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः। परास
रात्मजो विद्वान्‌ब्रह्मर्षिः शंसितव्रतः। तदाख्यानवरिष्टं स कृत्वा द्वैपायनं प्रभुः। कथमध्यापयानीह शिष्यानित्यन्वचिंत
यत्‌। तस्य तच्चिंतितं ज्ञात्वा ऋषेर्द्वैपायनस्य च। तत्राजगाम भगवान्‌ब्रह्मा लोकगुरुः स्वयं। प्रीत्यर्थं तस्य चैव वर्षेर्लोकानां
हितकाम्यया। तं दृष्ट्वा विस्मितो भूत्वा प्रांजलिः प्रणतः स्थितः। आसनं कल्पयामास सर्वैर्मुनिगणैर्वृतः। हिरण्यगर्भम
सीनं तस्मिंस्तु परमासने। परिवृत्यासनाभ्यासे वासवेयः स्थितो भवत्‌। अनुज्ञातोथ कृष्णस्तु ब्रह्मणा परमेष्ठिना॥
निषसादासनाभ्यासे प्रियमाणः शुचिः स्मितः। उवाच स महातेजा ब्रह्माणं परमेष्ठिनं। कृतं मयेदं भगवन्काव्यं
परमपूजितं। ब्रह्मवेदरहस्यं च यच्चान्यत्स्थापितं मया॥ सांगोपनिषदां चैव वेदानां विस्तरक्रिया। इतिहासपुराणानां
नामुन्मेषं निर्मितं च यत्‌। भूतं भव्यं भविष्यं यत्त्रिविधं कालसंज्ञितं। जरामृत्युभयव्याधिभावाभावविनिश्चयः। विवि
धस्य च धर्मस्य ह्याश्रमाणां च लक्षणं। चातुर्वर्ण्यविधानं च पुराणार्थं च कृत्स्नशः। तपसो ब्रह्मचर्यस्य पृथिव्याश्चं
द्रसूर्ययोः। ग्रहनक्षत्रताराणां प्रमाणं च युगैः सह। ऋचो यजूंषि सामानि वेदाध्यात्मं तथैव च। न्यायशिक्षाचिकि
त्सा च दानं पाशुपतं तथा। हेतुनैव समं जन्म दिव्यमानुषसंज्ञितं। तीर्थानां चैव पुण्यानां देशानां चैव कीर्त्तनं। नदीनां

पर्वतानांचवनानांसागरस्यच। पुराणानांचैवदिव्यानांकल्पानांयुद्धकौशलं। वाक्यजातिविशेषाश्चलोकयात्राक्रम
श्चयः। यच्चापिसर्वगंवस्तुतच्चैवप्रतिपादितं। परंनलेखकःकश्चिदेतस्यभुविविद्यते॥ ब्रह्मोवाच ॥ तपोवि
शिष्टादपिवैविशिष्टान्मुनिसंचयात्। मन्येश्रेष्ठतरंत्वांवैरहस्यज्ञानवेदनात्। जन्मप्रभृतिसत्यांतेवेद्मिगांब्रह्मवादि
नीं। त्वयाचकाव्यमित्युक्तंतस्मात्काव्यंभविष्यति। अस्यकाव्यस्यकवयोनसमर्थाविशेषणे। विशेषणेगृहस्थस्यशे
षास्त्रयइवाश्रमाः। काव्यस्यलेखनार्थायगणेशःस्मर्यतांमुने॥ सूतउवाच ॥ एवमाभाष्यतंब्रह्माजगाम
स्वंनिवेशनं। ततःसंस्माहेरंबंव्यासःसत्यवतीसुतः। स्मृतमात्रोगणेशानोभक्तचिंतितपूरकः। तत्राजगामविघ्नेशोय
वेदव्यासोयतस्स्थितः। पूजितश्चोपविष्टश्चव्यासेनोक्तस्तदानघ। लेखकोभारतस्यास्यभवत्वंगणनायक। मयैवप्रो
च्यमानस्यमनसाकल्पितस्यच। श्रुत्वैतत्प्राहविघ्नेशोयदिमेलेखनीक्षणं। लिखतोनावतिष्ठेततदास्यांलेखकोह्यहं॥
व्यासोप्युवाचतंदेवमबुद्ध्वामालिखक्वचित। ओमित्युक्त्वागणेशोपिबभूवकिललेखकः। ग्रंथग्रंथिंतदाचक्रेमुनिर्गूढं
कुतूहलात्। यस्मिन्प्रतिज्ञयाप्राहमुनिर्द्वैपायनस्त्विदं। अष्टौश्लोकसहस्राणिअष्टौश्लोकशतानिच। अहंवेद्मिशुको
वेत्तिसंजयोवेत्तिवानवा। तत्श्लोककूटमद्यापिग्रथितंसुदृढंमुने। भेत्तुंनशक्यतेर्थस्यगूढत्वात्प्रश्रितस्यच। सर्वज्ञो

पिगणेशोयत्क्षणमास्तेविचारयन्॥ तावच्चकारव्यासोपिश्लोकानन्यान्बहूनपि। अज्ञानतिमिरांधस्यलोकस्यतुवि
चेष्टतः। ज्ञानांजनशलाकाभिर्नेत्रोन्मीलनकारकं। धर्मार्थकाममोक्षार्थैःसमासव्यासकीर्त्तनैः। तथाभारतसूर्ये
णनृणांविनिहतंतमः। पुराणपूर्णचंद्रेणश्रुतिज्योत्स्नाःप्रकाशिताः। नृबुद्धिकैरवाणांचकृतमेतत्प्रकाशनं। इतिहा
सप्रदीपेनमोहावरणघातिना। लोकगर्भगृहंकृत्स्नंयथावत्संप्रकाशितं। संग्रहाध्यायबीजोवैपौलोमास्तीकमूलवा
न्। संभवस्कंधविस्तारःसभारण्यविटंकवान्। अरणीपर्वरूपाढ्योविराटोद्योगसारवान्। भीष्मपर्वमहाशाखोद्रो
णपर्वपलाशवान्। कर्णपर्वसितैःपुष्पैःशल्यपर्वसुगंधिभिः। स्त्रीपर्वैषीकविश्रामःशांतिपर्वमहाफलः। तस्यवृक्ष
स्यवक्ष्यामिशश्वत्पुष्पफलोदयं। स्वादुमेध्यरसोपेतमच्छेद्यममरैरपि। मातुर्न्नियोगाद्धर्मात्मागांगेयस्यचधीमतः
। क्षेत्रेविचित्रवीर्यस्यकृष्णद्वैपायनःपुरा। त्रीनग्नीनिवकौरव्यान्जनयामासवीर्यवान्। उत्पाद्यधृतराष्ट्रंचपाण्डुंवि
दुरमेवच। जगामतपसेधीमान्पुनरेवाश्रमंप्रति। तेषुजातेषुवृद्धेषुगतेषुपरमांगतिं। अब्रवीद्भारतंलोकेमानुषेस्मि
न्महानृषिः। जनमेजयेनपृष्टःसन्ब्राह्मणैश्चसहस्रशः। शशासशिष्यमासीनंवैशम्पायनमन्तिके। ससदस्यैःसहा
सीनःश्रावयामासभारतं। कर्म्मान्तरेषुयज्ञेषुचोद्यमानःपुनःपुनः। विस्तरंकुरुवंशस्यगांधार्य्याधर्म्मशीलतां। वि

त्तुःप्रज्ञांधृतिंकुंत्याःसम्यक्द्वैपायनोब्रवीत्।वासुदेवस्यमाहात्म्यंपाण्डवानांचसत्यतां।दुर्वृत्तंधार्त्तराष्ट्राण
मुक्तवान्भगवान्नृषिः।चतुर्विंशतिसाहस्रीं चक्रेभारतसंहितां।उपाख्यानैर्विनातावद्भारतंप्रोच्यतेबुधैः
।ततोध्यर्द्धशतंभूयःसंक्षेपंकृतवान्नृषिः।अनुक्रमणिकाध्यायंवृत्तान्तानांसपर्वणां।इमंद्वैपायनःपूर्वंपु
त्रमध्यापयच्छुकं।ततोन्येभ्योनुरूपेभ्यःशिष्येभ्यःप्रददौविभुः।षष्टिंशतसहस्राणिचकारान्यांससंहितां।
त्रिंशच्छतसहस्रंचदेवलोकेप्रतिष्ठितं।पित्र्येपंचदशप्रोक्तंरक्षोयक्षेचतुर्द्दश॥एकंशतसहस्रंतुमानुषे
प्रतिष्ठितं।नारदोश्रावयद्देवानसितोदेवलःपितॄन्।गंधर्वयक्षरक्षांसिश्रावयामासवैशुकः।अस्मिंस्तुमा
नुषेलोकेवैशम्पायनउक्तवान्।शिष्योव्यासस्यधर्म्मात्मासर्ववेदविदांवरः।एकंशतसहस्रंतुमयोक्तंवैनि
बोधत।दुर्य्योधनोमन्युमयोमहाद्रुमःस्कंधःकर्णःशकुनिस्तस्यशाखाः।दुःशासनःपुष्पफलेसमृद्धेमू
लंराजाधृतराष्ट्रोमनीषी॥युधिष्ठिरोधर्म्ममयोमहाद्रुमःस्कंधोर्जुनोभीमसेनस्यशाखाः।माद्रीसुतौपुष्प
फलेसमृद्धेमूलंकृष्णोब्रह्मचब्राह्मणाश्च॥पाण्डुर्जित्वाबहून्देशान्बुध्याविक्रमणेनच।अरण्येमृगया
शीलोन्यवसत्सजनस्तदा।मृगव्यवायनिधनात्कृच्छ्रांप्रापसआपदं।जन्मप्रभृतिपार्थानांतत्राचारविधिक्र

मः।मात्रोरभ्युपपत्तिश्चधर्म्मोपनिषदंश्रुति।धर्म्मस्यवायोःशक्रस्यदेवयोश्चतथाश्विनोः।तापसैःसह
संवृद्धामातृभ्यांपरिरक्षिताः।मेध्यारण्येषुपुण्येषुमहतामाश्रयेषुच।ऋषिभिर्यत्तदानीताधार्त्तराष्ट्रा
न्प्रतिस्वयं।शिशवश्चाभिरूपाश्चजटिलाब्रह्मचारिणः।पुत्राश्चभ्रातरश्चेमेशिष्याश्चसुहृदश्चवः।पांडवा
एतइत्युक्त्वामुनयोन्तर्हितास्ततः।तांस्तैर्निवेदितान्दृष्ट्वापाण्डवान्कौरवास्तदा।शिष्टाश्चवर्ण्णाःपौरायेतेह
र्षाच्चुक्रुशुर्भृशं।आहुःकेचिन्नतस्यैतेतस्यैतइतिचापरे।यदाचिरमृतःपाण्डुःकथंतस्येतिचापरे।स्वाग
तंसर्वथादिष्ट्यापांडोःपश्यामसंततिं।उच्यतांस्वागतमितिवाचोश्रूयन्तसर्वशः।तस्मिन्नुपरतेशब्देदिशः
सर्वानिनादयन्।अंतर्हितानांभूतानांनिस्वनस्तुमुलोभवत्।पुष्पवृष्टिःशुभागंधाःशंखदुंदुभिनिस्वनाः।
आसन्प्रवेशेपार्थानांतदद्भुतमिवाभवत्।तत्प्रीत्याचैवसर्वेषांपौराणांहर्षसंभवः।शब्दआसीन्महांस्त
त्रदिवस्पृक्कीर्त्तिवर्द्धनः।तेधीत्यनिखिलान्वेदाञ्छास्त्राणिविविधानिच।न्यवसन्पांडवास्तत्रपूजिताअकुतो
भया४।युधिष्ठिरस्यशीलेनप्रीताःप्रकृतयोभवन्।धृत्याचभीमसेनस्यविक्रमेणार्ज्जुनस्यच।गुरुशुश्रूषया
क्षांत्यायमयोर्विनयेनच।तुतोषलोकःसकलस्तेषांशौर्यगुणेनच।समवायेततोराज्ञांकन्यांभर्तृस्वयंव

रां।प्राप्तवानर्जुनःकृष्णांकृत्वाकर्म्मसुदुष्करं।ततःप्रभृतिलोकेस्मिन्पूज्यःसर्वधनुष्मतां।आदित्यइवदुःप्रे
क्ष्यःसमरेष्वपिचाभवत्।ससर्वान्पार्थिवान्जित्वासर्वांश्चमहतोगणान्।आजहारार्जुनोराज्ञोराजसूयंम
हाक्रतुं।अन्नवान्दक्षिणावांश्चसर्वैःसमुदितोगुणैः।युधिष्ठिरेणसंप्राप्तोराजसूयोमहाक्रतुः।सुनया
द्वासुदेवस्यभीमार्जुनबलेनच।घातयित्वाजरासंधंचैद्यंचबलगर्वितं।दुर्य्योधनंसमागच्छन्नर्हणानिततस्त
तः।मणिकांचनरत्नानिगोहस्त्यश्वधनानिच।विचित्राणिचवासांसिप्रावारावरणानिच।कंबलाजिनर
त्नानिरांकवास्तरणानिच।समृद्धांतांतथादृष्ट्वापांडवानांतदाश्रियं।ईर्ष्यासमुत्थःसमहांस्तस्यमन्युरजाय
त।विमानप्रतिमांतत्रमयेनसुकृतांसभां।पांडवानामुपहृतांसदृष्ट्वापर्य्यतप्यत।तत्रावहसितश्चासीत्
प्रस्कंदन्निवसंभ्रमात्।प्रत्यक्षंवासुदेवस्यभीमसेनादिभिस्तदा।सभोगान्विविधान्भुंजन्रत्नानिविवि
धानिच।कथितोधृतराष्ट्रस्यविवर्णोहरिणःकृशः।अन्वजानात्ततोद्यूतंधृतराष्ट्रःसुतप्रियः।तच्छ्रुत्वावासु
देवस्यकोपःसमभवन्महान्।नातिप्रीतमनाश्चासीद्विवादांश्चान्वमोदत।द्यूतादीनन्यायान्घोरान्विविधां
श्चाप्युपैक्षत।निरस्यविदुरंभीष्मंद्रोणंशारद्वतंकृपं।विग्रहेतुमुलेतस्मिन्दहन्क्षत्रंपरस्परं।जयत्सु

आ॰ प॰
६

पाण्डुपुत्रेषुश्रुत्वासुमहदश्रियं।दुर्योधनमतंज्ञात्वाकर्णस्यशकुनेस्तथा॥धृतराष्ट्रश्चिरंध्यात्वासंजयंवा
क्यमब्रवीत्।शृणुसंजयसर्वंमेनचासूयितुमर्हसि।श्रुतवानसिमेधावीबुद्धिमान्प्राज्ञसंमतः।नविग्रहेम
ममतिर्नचप्रीयेकुलक्षये।नमेविशेषःपुत्रेषुस्वेषुपांडुसुतेषुवा॥वृद्धंमामभ्यसूयंतिपुत्रामन्युपरायणाः।
अहंत्वचक्षुःकार्पण्यात्पुत्रप्रीत्यासहामितत्।मुह्यंतंचानुमुह्यामिदुर्योधनमचेतनं।राजसूयेश्रियंदृष्ट्वा
पांडवस्यमहौजसः।तच्चावहसनंप्राप्यसभारोहणदर्शने।अमर्षणःस्वयंजेतुमशक्तःपांडवान्रणे।नि
रुत्साहश्चसंप्राप्तुंसुश्रियंक्षत्रियोपिसन्।गांधारराजसहितश्छद्मद्यूतममंत्रयत्।तत्रयद्यद्यथाज्ञातंमया
संजयतच्छृणु।श्रुत्वातुममवाक्यानिबुद्धियुक्तानितत्वतः।ततोज्ञास्यसिमांसौतेप्रज्ञाचक्षुषमित्युत॥यदा॰
श्रौषंधनुरायम्यचित्रंविद्धंलक्ष्यंसंपातितंवैपृथिव्यां।कृष्णांहृतांप्रेक्षतांसर्वराज्ञांतदानाशंसेविजयायसंजय
॥यदाश्रौषंद्वारकायांसुभद्रांप्रसह्योढांमाधवीमर्जुनेन।इंद्रप्रस्थंवृष्णिवीरौचयातौतदानाशंसेविजयाय
संजय॥यदाश्रौषंदेवराजंप्रविष्टंशरैर्दिव्यैर्वारितंचार्जुनेन।अग्निंतदातर्पितंखांडवेचतदानाशंसेविजयाय
संजय॥यदाश्रौषंजातुषाद्वेश्मनस्तान्मुक्तान्पार्थान्पंचकुंत्यासमेतान्।युक्तंचैषांविदुरंस्वार्थसिद्धौतदा॰॥

६

यदाश्रौषं द्रौपदीं रंगमध्ये लक्ष्यं भित्वा निर्जितामर्ज्जुनेन। शूरान्पांचालान्पांडवेयांश्च युक्तांस्तदा०॥ यदाश्रौषं मागधा
नां वरिष्ठं जरासंधं क्षत्रमध्ये ज्वलंतं। दोर्भ्यां हतं भीमसेनेन गत्वा तदा०॥ यदाश्रौषं दिग्जये पांडुपुत्रैर्वशीकृतान्भूमि
पालान्प्रसह्य। महाक्रतुं राजसूयं कृतं च तदा०॥ यदाश्रौषं द्रौपदीमश्रुकंठीं सभां नीतां दुःखितामेकवस्त्रां। रजस्वलां
नाथवतीमनाथवत्तदा०॥ यदाश्रौषं वाससां तत्र राशिं समाक्षिपत्कितवो मंदबुद्धिः। दुःशासनो गतवान्नैव चांतं
तदा०॥ यदाश्रौषं हृतराज्यं युधिष्ठिरं पराजितं सौबलेनाक्षवत्यां। अन्वागतं भ्रातृभिरप्रमेयैस्तदा०॥ यदाश्रौषं वि
विधास्तत्र चेष्टा धर्मात्मनां प्रस्थितानां वनाय। ज्येष्ठप्रीत्या क्लिश्यतां पांडवानां तदा०॥ यदाश्रौषं स्नातकानां सहस्रै
रन्वागतं धर्मराजं वनस्थं। भिक्षाभुजां ब्राह्मणानां महात्मनां तदा०॥ यदाश्रौषमर्जुनं देवदेवं किरातरूपं त्र्यंबकं तोष्य
युद्धे। अवाप्तवंतं पाशुपतं महास्त्रं तदा०॥ यदाश्रौषं त्रिदिवस्थं धनंजयं शक्रात्साक्षाद्दिव्यमस्त्रं यथावत्। अधीयानं
शंसितं सत्यसंधं तदा०॥ यदाश्रौषं कालकेयास्ततस्ते पौलोमानो वरदानाच्च दृप्ताः। देवैरजेया निर्जिताश्चार्जुनेन तदा०
॥ यदाश्रौषमसुराणां वधार्थी किरीटिनं यांतममित्रकर्षणं। कृतार्थं चाप्यागतं शक्रलोकात्तदा०॥ यदाश्रौषं वैश्रव
णेन सार्द्धं समागतं भीममन्यांश्च पार्थान्। तस्मिन्देशे मानुषाणामगम्ये तदा०॥ यदाश्रौषं घोषयात्रागतानां बंधं ग

आ०प०
७

धर्वैर्मोक्षणंचार्जुनेन।स्वेषांसुतानांकर्णबुद्धौरतानांतदा०॥यदाश्रौषंयक्षरूपेणधर्मंसमाम्नातंधर्मराजेनसूत।प्र
श्नानुक्तांश्चिद्विब्रुवाणंचसम्यक्तदा०॥यदाश्रौषंनविदुर्मामकास्तान्प्रच्छन्नरूपांश्चसतःपांडवेयान्।विराटराष्ट्रेसहकृ
ष्णयातांस्तदा०॥यदाश्रौषंमामकानांवरिष्ठान्धनंजयेनैकरथेनभग्नान्।विराटराष्ट्रेवसतामहात्मनातदा०॥य
दाश्रौषंसत्कृतांमत्स्यराज्ञासुतांदत्तामुत्तरामर्जुनाय।तांचार्जुनःप्रत्यगृह्णात्सुतार्थेतदा०॥यदाश्रौषंनिर्जितस्याध
नस्यप्रव्राजितस्यस्वजनात्प्रच्युतस्य।अक्षौहिणीःसप्तयुधिष्ठिरस्यतदा०॥यदाश्रौषंमाधवंवासुदेवंसर्वात्मनापांडवा
र्थेनिविष्टं।यस्येमांगांविक्रममेकमाहुस्तदा०॥यदाश्रौषंनरनारायणौतौकृष्णार्जुनौवदतोनारदस्य।अहंद्रष्टाब्रह्म
लोकेचसम्यक्तदा०॥यदाश्रौषंलोकहितायकृष्णंशमार्थिनमुपयातंकुरूणां।शमंकुर्वाणमकृतार्थंचयातंतदा०॥
यदाश्रौषंकर्णदुर्योधनाभ्यांबुद्धिंकृतांनिग्रहेकेशवस्य।तंचात्मानंबहुधादर्शयानंतदा०॥यदाश्रौषंवासुदेवेप्रया
तेरथस्यैकामग्रतस्तिष्ठमानां।आर्तांपृथांसांत्वितांकेशवेनतदा०॥यदाश्रौषंमंत्रिणंवासुदेवंतथाभीष्मंशांतनवंच
तेषां।भारद्वाजंचाशिषोनुब्रुवाणंतदा०॥यदाकर्णोभीष्ममुवाचवाक्यंनाहंयोत्स्येजीवमानेत्वयीति।हित्वासेनामपच
क्रामचापितदा०॥यदाश्रौषंवासुदेवार्जुनौतौतथाधनुर्गांडिवमप्रमेयं।त्रीण्युग्रवीर्याणिसमागतानितदा०॥यदाश्रौ

७

षंकश्मलेनाभिपन्नेरथोपस्थेसीदमानेर्जुनेवै।कृष्णंलोकान्दर्शयानंशरीरेतदा०॥यदाश्रौषंभीष्ममभित्रक
र्शनंनिघ्नंतमाजावयुतंरथानां।नैषांकश्चिद्वध्यतेख्यातरूपस्तदा०॥यदाश्रौषंचापगेयेनसंख्येस्वयंमृत्युंवि
हितंधार्मिकेण।तच्चाकार्षुःपांडवेयाःप्रहृष्टास्तदा०॥यदाश्रौषंभीष्ममत्यंतशूरंहतंपार्थेनाहवेष्वप्रधृष्यं।
शिखंडिनंपुरतःस्थापयित्वातदा०॥यदाश्रौषंशरतल्पेशयानंवृद्धंवीरंसादितंचित्रपुंखैः।भीष्मंकृत्वासोमका
नल्पशेषांस्तदा०॥यदाश्रौषंशांतनवेशयानेपानीयार्थेनोदितेनार्जुनेन।भूमिंभित्वातर्पितंतत्रभीष्मंतदा०॥
यदावायुःशक्रसूर्यौचयुक्तौकौंतेयानामनुलोमाजयाय।नित्यंचास्मान्श्वापदाभीषयंतितदा०॥यदाद्रोणो
विविधानस्त्रमार्गान्निदर्शयन्समरेचित्रयोधी।नपांडवाञ्छ्रेष्ठतरान्निहंतितदा०॥यदाश्रौषंचास्मदीयान्महार
थान्व्यवस्थितानर्जुनस्यांतकाय।संसप्तकान्निहतानर्जुनेनतदा०॥यदाश्रौषंव्यूहमभेद्यमन्यैर्भारद्वाजेनात्तश
स्त्रेणगुप्तं।भित्वासौभद्रंवीरमेकंप्रविष्टंतदा०॥यदाभिमन्युंपरिवार्यबालंसर्वेहत्वाहृष्टरूपाबभूवुः।महारथाः
पार्थमशक्नुवंतस्तदा०॥यदाश्रौषमभिमन्युंनिहत्यहर्षान्मूढान्क्रोशतोधार्त्तराष्ट्रान्।क्रोधादुक्तेसैंधवेचार्जुने
नतदा०॥यदाश्रौषंसैंधवार्थेप्रतिज्ञांप्रतिज्ञातांतद्वधायार्जुनेन।सत्यांतीर्णांशत्रुमध्येचतेनतदा०॥यदाश्रौषंम

श्रांतहयेधनंजये मुक्त्वाहयान्यायधित्वोपवृत्तान्। पुनर्युक्त्वा वासुदेवं प्रयातं तदा०॥ यदाश्रौषं वाहनेष्वक्लमे
धुरथोपस्थे तिष्ठतागांडिवेन। सर्वान्योधान्वारितानर्जुनेन तदा०॥ यदाश्रौषं नागबलैः सुदुःसहं द्रोणानीकं
युयुधानं प्रमथ्य। यातं वार्ष्णेयं यत्र तौ कृष्णपार्थौ न तदा०॥ यदाश्रौषं कर्णमासाद्य मुक्तं वधाद्भीमं कुत्सयित्वा व
चोभिः। धनुःकोट्यातुद्य कर्णेन वीरं तदा०॥ यदाद्रोणः कृतवर्माकृपश्च कर्णो द्रौणिर्मद्रराजश्च शूरः। अमर्षय
न्सैंधवं वध्यमानं तदा०॥ यदाश्रौषं देवराजेन दत्तां दिव्यां शक्तिं व्यंसितां माधवेन। घटोत्कचे राक्षसे घोररूपे त
दा०॥ यदाश्रौषं कर्णघटोत्कचाभ्यां युद्धे मुक्तां सूतपुत्रेण शक्तिं। यया वध्यः समरे सव्यसाची न तदा०॥ यदाश्रौ
षं द्रोणिना द्वैरथस्थं माद्रीसुतं नकुलं लोकमध्ये। समं युद्धे मंडलशश्चरंतं तदा०॥ यदाद्रोणे निहते द्रोणपुत्रो
नारायणं दिव्यमस्त्रं विकुर्वन्। नैषामंतं गतवान्पांडवानां तदा०॥ यदाश्रौषं भीमसेनेन पीतं रक्तं भ्रातुर्युधि
दुःशासनस्य। निवारितं नान्यतेन भीमं तदा०॥ यदाश्रौषं कर्णमत्यंतशूरं हतं पार्थेनाहवेष्वप्रधृष्यं तस्मि
न्भ्रातॄणां विग्रहे देवगुह्ये तदा०॥ यदाश्रौषं द्रोणपुत्रं कृपं च दुःशासनं कृतवर्माणमुग्रं। युधिष्ठिरं धर्मरा
जं जयंतं तदा०॥ यदाश्रौषं निहतं मद्रराजं रणे शूरं धर्मराजेन सूत। सदा संग्रामे स्पर्द्धते यस्तु कृष्णं तदा०॥ यदा

श्रौषंकलहद्यूतमूलंमायावलंसौवलंपांडवेन।हतंसंग्रामेसहदेवेनपापंतदा०॥यदाश्रौषंश्रांतमेकंशया
नंह्रदंगत्वास्तंभयित्वातदंभः।दुर्योधनंविरथंभग्नशक्तिंतदा०॥यदाश्रौषंपांडवांस्तिष्ठमानान्गत्वाह्रदे
वासुदेवेनसार्द्धं।अमर्षणंधर्षयंतःसुतंमेतदा०॥यदाश्रौषंविविधांश्चित्रमार्गान्गदायुद्धेमंडलशश्चरंतं।
मिथ्याहतंवासुदेवस्यबुध्यातदा०॥यदाश्रौषंद्रोणपुत्रादिभिस्तैर्हतान्पांचालान्द्रौपदेयांश्चसुप्तान्।कृतंवी
भत्समयशस्यंचकर्मतदा०॥यदाश्रौषंभीमसेनानुयातेनाश्वत्थाम्नापरमास्त्रंप्रयुक्तं।क्रुद्धेनैषीकमव
धीद्येनगर्भंतदा०॥यदाश्रौषंब्रह्मशिरोर्जुनेनस्वस्तीत्युक्त्वाचास्त्रमस्त्रेणशांतं।अश्वत्थाम्नामणिरत्नंच
दत्तंतदा०॥यदाश्रौषंद्रोणपुत्रेणगर्भेवैराट्यावैपात्यमानेमहास्त्रैः।द्वैपायनःकेशवोद्रोणपुत्रंपरस्परे
णाभिशापैःशशाप।गांधारीपुत्रपौत्रैर्विहीनातथावंधुभिःपितृभिःभ्रातृभिश्च।कृतंकार्यंदुष्करंपांडवे
यैःप्राप्तंराज्यमसपत्नंपुनस्तैः।कष्टंयुद्धेदशशेषाःश्रुतामेत्रयोस्माकंपांडवानांचसप्त।द्व्यूनाविंशतिरा
हताक्षौहिणीनांतस्मिन्संग्रामेभैरवेक्षत्रियाणां॥तमस्यतीवविस्तीर्णमोहआविशतीवमां।संज्ञांनोप
लभेसूतमनोविह्वलतीवमे॥ सौतिरुवाच ॥इत्युक्त्वाधृतराष्ट्रोथविलप्यबहुदुःखितः।मूर्छितः

आ०प०
९

पुनराश्वस्तःसंजयंवाक्यमब्रवीत्।श्रृणुसंजयसर्वंत्वंनमेसूयितुमर्हसि।संजयेवंगतेप्राणांस्त्यक्तुमि
छामिमाचिरं।स्तोकंह्यपिनपश्यामिफलंजीवितधारणे सौतिरुवाच तंतथावादिनंदीनंविल
पंतंमहीपतिं।निश्वसंतंयथानागंमुह्यमानंपुनःपुनः।गावल्गणिरिदंधीमान्महार्थंवाक्यमब्रवीत्
संजयउवाच श्रुतवानसिवैराजन्महोत्साहान्महाबलान्।द्वैपायनस्यवदतोनारदस्यचधीमतः।मह
त्सुराजवंशेषुगुणैःसमुदितेषुच।जातान्दिव्यास्त्रविदुषःशक्रप्रतिमतेजसः।धर्म्मेणपृथिवींजित्वायज्ञैः
रिष्ट्वाप्तदक्षिणैः।अस्मिंल्लोकेयशःप्राप्यततःकालवशंगतान्।शैब्यंमहारथंवीरंसंजयंजयतांवरं।सुहो
त्रंरतिदेवंचकक्षीवंतंमहाद्युतिं।वाल्हीकंदमनंचैद्यंशर्य्यातिमजितंनलं।विश्वामित्रममित्रघ्नमंवरीषंम
हावलं।मरुत्तंमनुमिक्ष्वाकुंगयंभरतमेवच।रामंदाशरथिंचैवशशविंदुंभगीरथं।कृतवीर्यंमहाभागं
तथैवजनमेजयं।ययातिंशुभकर्माणंदेवैर्योयाजितःस्वयं।चैत्ययूपांकिताभूमिर्यस्येयंसवनाकरा।इ
तिराज्ञांचतुर्विंशंनारदेनसुरर्षिणा।पुत्रशोकाभितप्तायपुराश्वैत्यायकीर्त्तितं।तेभ्यश्चान्येमताःपूर्वंराजानो
वलवत्तराः।महारथामहात्मानःसर्वैःसमुदितागुणैः।पुरुःकुरुर्यदुःशूरोविष्वगश्वोमहाद्युतिः।अणुहो

९

युवनाश्वश्चककुत्स्थोविक्रमीरघुः।विजितोवीतिहोत्रोंगोभवःश्वेतोबृहद्गुरुः।उशीनरःशतरथःकंकोदुलि
दुहोद्रुमः।दंभोद्भवःपरोवेणःसगरःसंकृतिर्निमिः।अजेयःपरशुःपुंड्रःशंभुर्देवावृधोनघः।देवाह्वयःसुप्र
तिमःसुप्रतीकोबृहद्रथः।महोत्साहोविनीतात्मासुक्रतुर्नैषधोनलः।सत्यव्रतःशांतभयःसुमित्रःसुबलः
प्रभुः।जानुजंघोऽनरण्योर्कःप्रियभृत्यःशुचिव्रतः।बलसिंधुर्निरामर्दःकेतुशृंगोबृहद्बलः।धृष्टकेतुर्बृहत्के
तुर्दीप्तकेतुर्निरामयः।अविक्षिच्चपलोधूर्तःकृतबंधुर्दृढेषुधिः।महापुराणःसंभाव्यःप्रत्यंगःपरहाश्रुतिः।
एतेचान्येचराजानःशतशोथसहस्रशः।श्रूयंतेयुतशश्चान्येसंख्याताश्चैवपद्मशः।हित्वासुविपुलान्भो
गान्बुद्धिमंतोमहाबलाः।राजानोनिधनंप्राप्तास्तवपुत्राइवप्रभो।येषांदिव्यानिकर्माणिविक्रमस्त्यागए
वच।माहात्म्यमपिचास्तिक्यंसत्यंशौचंदयार्जवं।विद्वद्भिःकथ्यतेलोकेपुराणेकविसत्तमैः।सर्वर्द्धिगुणसं
पन्नास्तेचापिनिधनंगताः।तवपुत्रादुरात्मानःप्रतप्ताश्चैवमन्युना।लुब्धादुर्वृत्तभूयिष्ठानतांश्छोचितुमर्हसि।
श्रुतवानसिमेधावीबुद्धिमान्प्राज्ञसम्मतः।येषांशास्त्रानुगाबुद्धिर्नतेमुह्यंतिभारत।निग्रहानुग्रहोचापिवि
दितौतेनराधिपः।नात्यंतमेवानुवृत्तिःश्रूयतेपुत्ररक्षणे।भवितव्यंतथातच्चनानुशोचितुमर्हसि।दैवंप्रज्ञा

विशेषेणकोनिवर्त्तितुमर्हति।विधातृविहितंमार्गंनकश्चिदतिवर्त्तते।कालमूलमिदंसर्वंभावाभावौसुखा
सुखे।कालःसृजतिभूतानिकालःसंहरतेप्रजाः।निर्दहंतिप्रजाःकालःकालःशमयतेपुनः।कालोहिकुरु
तेभावान्सर्वांल्लोकेशुभाशुभान्।कालःसंक्षिपतेसर्वाःप्रजाविसृजतेपुनः।कालःसुप्तेप्रजागर्त्तिकालोहिदु
रतिक्रमः।कालःसर्वेषुभूतेषुचरत्यविहृतःसमः।अतीतानागताभावायेचवर्त्तंतिसांप्रतं।तात्कालनिर्मिता
न्बुध्वानसंज्ञांहातुमर्हसि   सौतिरुवाच   इत्येवंपुत्रशोकार्त्तंधृतराष्ट्रंजनेश्वरं।आश्वास्यस्वस्थ
मकरोत्सूतोगावल्गणिस्तदा।अत्रोपनिषदंपुण्यांकृष्णद्वैपायनोब्रवीत्।विद्वद्भिःकथ्यतेलोकेपुराणेकवि
सत्तमैः।भारताध्ययनंपुण्यमपिपादमधीयतः॥श्रद्दधानस्यपूयंतेसर्वपापान्यशेषतः।देवादेवर्षयोह्यत्र
तथाब्रह्मर्षयोमलाः।कीर्त्यंतेशुभकर्माणस्तथायक्षामहोरगाः।भगवान्वासुदेवश्चकीर्त्यतेत्रसनातनः।
सहिसत्यमृतंचैवपवित्रंपुण्यमेवच।शाश्वतंब्रह्मपरमंध्रुवंज्योतिःसनातनं।यस्यदिव्यानिकर्माणिकथयंति
मनीषिणः।असच्चसदसच्चैवयस्माद्विश्वंप्रवर्त्तते।संततिश्चप्रवृत्तिश्चजन्ममृत्युपुनर्भवाः॥अध्यात्मंश्रूयतेय
च्चपंचभूतगुणात्मकं।अव्यक्तादिपरंयच्चसएवपरिगीयते।यत्तद्यतिवरायुक्ताध्यानयोगबलान्विताः।प्रतिबिं

वमिवादर्शोपस्पृश्य त्वात्मन्यवस्थितं। श्रद्दधानः सदा युक्तः सत्यधर्मपरायणः। आसेवन्निममध्यायं नरः पापात्प्र
मुच्यते। अनुक्रमणिमध्यायं भारतस्येममादितः। आस्तिकः सततं शृण्वन्न कृच्छ्रेष्ववसीदति। उभे संध्ये जपन्
कृत्स्नं सद्यो मुच्येत किल्बिषात्। अनुक्रमण्या यावत्स्यादह्ना रात्र्या च संचितं। भारतस्य वपुर्ह्येतत्सत्यं चामृतमेव
च। नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा। ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठा चतुष्पदां। यथैतानीतिहासा
नां तथा भारतमुच्यते। यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमंततः। अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति। कार्ष्णं वेदमिमं विद्वाञ्श्रा
वयित्वार्थमश्नुते। भ्रूणहत्यादिकं चापि पापं जह्यादसंशयं। य इमं शुचिरध्यायं पठेत्पर्वणि पर्वणि। अधीतं भा
रतं तेन कृत्स्नं स्यादिति मे मतिः। यश्चैनं शृणुयान्नित्यमार्षं श्रद्धासमन्वितः। स दीर्घमायुः कीर्तिं च स्वर्गतिं चाप्नु
यान्नरः। एकतश्चतुरो वेदा भारतं चैतदेकतः। पुरा किल सुरैः सर्वैः समेत्य तुलया धृतं। चतुर्भ्यः सरहस्येभ्यो वे
देभ्यो ह्यधिकं यदा। तदाप्रभृति लोकेस्मिन्महाभारतमुच्यते। महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते। निरुक्त
मस्य यो वेद सर्वपापैः प्रमुच्यते। तपो न कल्कोऽध्ययनं न कल्कः स्वाभाविको वेदविधिर्न कल्कः। प्रसह्य वित्ताहरणं

गन्धर्वनादि। वेदाध्ययनं। पापं

वेदोक्तविधिः स्वर्गकामोऽश्वमेधेन यजेतेत्यादिः।

[Marginal note, top, in a different hand:] এতান্সর্ব্ব নকল্কঃ পাপংভবতি শুদ্ধঃ সাধনহেতু । অথ [illegible] কল্কঃ [illegible] কল্কঃ [illegible] ।
[illegible] কল্কঃ পাপং সকার্য্য [illegible] ।

नकल्कस्तान्येवभावोपहतानिकल्कः इतिश्रीमहाभारतेआदिपर्व्वण्यनुक्रमणिकाध्यायः
ऋषयऊचुः समंतपंचकमितियदुक्तंसूतनंदन।एतत्सर्व्वंयथातत्वंश्रोतुमिछामहेवयम्
सौतिरुवाच शृणुध्वंममभोविप्राब्रुवतश्चकथाःशुभाः।समन्तपंचकाख्यंवश्रोतुमर्हथसत्तमाः॥
त्रेताद्वापरयोःसंधौरामःशस्त्रभृतांवरः।असकृत्पार्थिवंक्षत्रंजघानामर्षचोदितः।ससर्व्वंक्षत्रमुत्सा
द्यस्ववीर्य्येणातुलद्युतिः।समंतपंचकेपंचचकाररौधरान्ह्रदान्।सतेषुरुधिरांभःसुह्रदेषुक्रोधमूर्छि
तः।पितॄन्संतर्प्पयामासरुधिरेणेतिनःश्रुतं।अथर्च्चीकादयोभ्येत्यपितरोराममब्रुवन्।रामराममहाभा
गप्रीताःस्मतवभार्गव।अनयापितृभक्त्याचविक्रमेणतवप्रभो।वरंवृणीष्वभद्रंतेयमिछसिमहाद्युते
॥ रामउवाच ॥यदिमेपितरःप्रीतायद्यनुग्राह्यतामयि।यच्चरोषाभिभूतेनक्षत्रमुत्सादितंमया।
मया।अतश्चपापान्मुच्येहमेषमेप्रार्थितोवरः।ह्रदाश्चतीर्थभूतामेभवेयुर्भुविविश्रुताः।एवंभविष्यतीत्ये
वंपितरस्तमथाब्रुवन्।तंक्षमस्वेतिनिषिषिधुस्ततःसविरराम्ह।तेषांसमीपेयोदेशोह्रदानांरुधिरांभसां॥
समंतपंचकमितिपुण्यंतत्परिकीर्त्तितं।येनलिंगेनयोदेशोयुक्तःसमुपलक्ष्यते।तेनैवनाम्नातंदेशंवाच्य

मातुर्कर्मनी घृणः॥ अंतरे चैव संप्राप्ते कलिद्वापरयोरभूत्। समंतपंचके युद्धं कुरुपांडवसेनयोः। तस्मिन्
परमधर्मिष्ठे देशे भूदोषवर्जिते। अष्टादश समाजग्मुरक्षौहिण्यो युयुत्सया। समेत्य तं द्विजास्ताश्च तत्रैव
निधनं गताः। एतन्नामाभिनिर्वृत्तं तस्य देशस्य वै द्विजाः। पुण्यश्च रमणीयश्च स देशो वः प्रकीर्तितः। तदेतत्क
थितं सर्वं मया ब्राह्मणसत्तमाः। यथा देशः स विख्यातस्त्रिषु लोकेषु सुव्रताः॥ ऋषय ऊचुः ॥
अक्षौहिण्य इति प्रोक्तं यत्त्वया सूतनंदन। एतदिच्छामहे श्रोतुं सर्वमेव यथातथं। अक्षौहिण्याः परीमाणं न
राश्वरथदंतिनां। यथावच्चैव नो ब्रूहि सर्वं हि विदितं तव सौतिरुवाच एको रथो गजश्चैको न
राः पंच पदातयः। त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते। पत्तिं तु त्रिगुणामेतामाहुः सेनामुखं बुधाः।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते। त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः। स्मृतास्तिस्रस्तु
वाहिन्यः पृतनेति विचक्षणैः। चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनी। अनीकिनीं दशगुणां प्राहुर
क्षौहिणीं बुधाः। अक्षौहिण्याः प्रसंख्यानं रथानां द्विजसत्तमाः। संख्या गणिततत्त्वज्ञैः सहस्राण्येकविंशतिः।
शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः। गजानां च परीमाणमेतदेव विनिर्दिशेत्। ज्ञेयं शतं सहस्रं च सह

स्त्राणिनवैवतुनराणामपिपंचाशछ्तानित्रीणिचानघाः।पंचषष्ठिसहस्राणितथाश्वानांशतानिचदशो
त्तराणिषट्प्राहुर्यथावदिहसंख्यया।एतामक्षौहिणींप्राहुःसंख्यातत्वविदोजनाः।यांवःकथितवान
स्मिविस्तरेणतपोधनाः।एतयासंख्ययाह्यासन्कुरुपांडवसेनयोः।अक्षौहिण्योद्विजश्रेष्टाःपिंडिताष्टा
दशैवतु।समेतास्तत्रवैदेशेतत्रैवनिधनंगताः।कौरवान्कारणंकृत्वाकालेनाद्भुतकर्मणा।अहानियुयु
धेभीष्मोदशैवपरमास्त्रवित्।अहानिपंचद्रोणस्तुररक्षकुरुवाहिनीं।अहनीयुयुधेद्वेतुकर्णःपरबला
र्दनः।शल्योर्द्धदिवसंचैवगदायुद्धमतःपरं।तस्यैवदिवसस्यान्तेद्रौणिहार्दिक्यगौतमाः।प्रसुप्तंनिशिवि
श्वस्तंजघ्नुर्यौधिष्ठिरंबलं।यत्तुशौनकसत्रेतेभारताख्यानमुत्तमं।जनमेजयस्यतत्सत्रेव्यासशिष्येणधी
मता।कथितंविस्तरार्थंचयशोवीर्यंमहीक्षितां।पौष्यंतत्रचपौलोममास्तीकंचादितःस्मृतं।विचित्रार्थपदा
ख्यानमनेकसमयान्वितं।अतिपन्नंनरैःप्राज्ञैर्वैराग्यमिवमोक्षिभिः।आत्मेववेदितव्येषुप्रियेष्विवहिजीवि
तं।इतिहासःप्रधानार्थःश्रेष्ठःसर्वागमेष्वयं।अनाश्रित्यैतदाख्यानंकथाभुविनविद्यते।आहारमनपाश्रि
त्यशरीरस्येवधारणं।तदेतद्भारतंनामकविभिस्तूपजीव्यते।उदयप्रेप्सुभिर्भृत्यैरभिजातइवेश्वरः।इतिहा

सोन्नमेवस्मिन्नर्प्पिताबुद्धिरुत्तमाः।स्वरव्यंजनयोःकृत्स्नालोकवेदाश्रयेववाक्।तस्यप्रज्ञाभिपन्नस्यवि
चित्रपदपर्व्वणः।भारतस्येतिहासस्यश्रूयतांपर्व्वसंग्रहः।पर्व्वानुक्रमणीपूर्व्वंद्वितीयःपर्वसंग्रहः।पौष्यंपौ
लोममास्तीकमादिवंशावतारणं।ततःसंभवपर्वोक्तमद्भुतंरोमहर्षणं।दाहोजतुगृहस्यात्रहैडिंबंपर्व्वचो
च्यते।ततोवकवधःपर्वपर्वचैत्ररथंततः।ततःस्वयंवरोदेव्याःपांचाल्याःपर्वचोच्यते।क्षात्रधर्मेणनिर्जित्य
ततोवैवाहिकंस्मृतं।विदुरागमनंपर्वराज्यलाभस्तथैवच।अर्जुनस्यवनेवासःसुभद्राहरणंततः।सुभद्रा
हरणादूर्ध्वंज्ञेयंहरणहारिकं।ततःखांडवदाहाख्यंतत्रैवमयदर्शनं।सभापर्वततःप्रोक्तंमंत्रपर्वततः
परं।जरासंधवधःपर्वपर्वदिग्विजयंतथा।पर्वदिग्विजयादूर्ध्वंराजसूयिकमुच्यते।ततश्चार्घाभिहरणंशि
शुपालवधस्ततः।द्यूतपर्वततःप्रोक्तमनुद्यूतमतःपरं।ततआरण्यकंपर्वकिर्मीरवधएवच।अर्जुनस्याभि
गमनंपर्वज्ञेयमतःपरं।ईश्वरार्जुनयोर्युद्धंपर्वकैरातसंज्ञितं।इंद्रलोकाभिगमनंपर्वज्ञेयमतःपरं।नलोपा
ख्यानमपिचधार्मिकंकरुणोदयं।तीर्थयात्राततःपर्वकुरुराजस्यधीमतः।जटासुरवधःपर्वयक्षयुद्धमतः
परं।निवातकवचैर्युद्धंपर्वचाजगरंततः।मार्कंडेयसमस्याचपर्वानंतरमुच्यते।संवादश्चततःपर्वद्रौपदी

सत्यभामयोः॥ घोषयात्रा ततः पर्व मृगस्वप्नोद्भवं ततः। व्रीहिद्रौणिकमाख्यानमैंद्रद्युम्नं तथैव च। द्रौपदीह
रणं पर्व सैंधवेन वनात्ततः। पतिव्रताया माहात्म्यं सावित्र्याश्चैवमद्भुतं। रामोपाख्यानमत्रैव पर्व ज्ञेयमतः प
रं। कुंडलाहरणं पर्व ततः परमिहोच्यते। आरणेयं ततः पर्व वैराटं तदनंतरं। पांडवानां प्रवेशश्च समयस्य च पाल
नं। कीचकानां वधः पर्व पर्व गोग्रहणं ततः। अभिमन्योश्च वैराट्याः पर्व वैवाहिकं स्मृतं। उद्योगपर्व विज्ञेयम
तऊर्ध्वं महाद्भुतं। ततः संजययानाख्यं पर्व ज्ञेयमतः परं। प्रजागरं तथा पर्व धृतराष्ट्रस्य चिंतया। पर्व सानत्सु
जातं च गुह्यमध्यात्मदर्शनं। यानसंधिस्ततः पर्व भगवद्यानमेव च। मातलीयमुपाख्यानं चरितं गालवस्य च।
सावित्रं वामदेवं च वैन्योपाख्यानमेव च। जामदग्न्यमुपाख्यानं पर्व षोडशराजिकं। सभाप्रवेशः कृष्णस्य वि
दुलापुत्रशासनं। उद्योगः सैन्यनिर्याणं श्वेतोपाख्यानमेव च। ज्ञेयं विवादपर्वात्र कर्णस्यापि महात्मनः। नि
र्याणं च ततः पर्व कुरुपांडवसेनयोः। रथातिरथसंख्या च पर्वोक्तं तदनंतरं। उलूकदूतागमनं पर्वामर्षविव
र्द्धनं। अंबोपाख्यानमत्रैव पर्व ज्ञेयमतः परं। भीष्माभिषेचनं पर्व ततश्चाद्भुतमुच्यते। जंबूखंडविनिर्माणं प
र्वोक्तं तदनंतरं। भूमिपर्व ततः प्रोक्तं द्वीपविस्तारकीर्तनं। पर्वोक्तं भगवद्गीता पर्व भीष्मवधस्ततः। द्रोणाभिषे

चनंपर्व्वसंसप्तकवधस्ततः।अभिमन्युवधःपर्व्वप्रतिज्ञापर्व्वचोच्यते।जयद्रथवधःपर्व्वविज्ञेयंलोमहर्षणं।मो
क्षोनारायणास्त्रस्यपर्व्वानंतरमुच्यते।कर्णपर्व्वततोज्ञेयंशल्यपर्व्वततःपरं।ह्रदप्रवेशनंपर्व्वगदायुद्धमतः
परं।सारस्वतेततःपर्व्वतीर्थवंशानुकीर्त्तनं।अतऊर्ध्वंसुबीभत्संपर्व्वसौप्तिकमुच्यते।ऐषीकंपर्व्वचोद्दिष्टमत
ऊर्ध्वंसुदारुणं।जलप्रदानिकंपर्व्वस्त्रीविलापस्ततःपरं।श्राद्धपर्व्वततोज्ञेयंकुरूणामौर्ध्वदेहिकं।चार्व्वाकनि
ग्रहःपर्व्वरक्षसोब्रह्मरूपिणः।आभिषेचनिकंपर्व्वधर्मराजस्यधीमतः।प्रविभागोगृहाणांचपर्व्वोक्तंतदनंतरं।
शांतिंपर्व्वततोयत्रराजधर्मानुशासनं।आपद्धर्मश्चपर्व्वोक्तंमोक्षधर्मस्ततःपरं।शुकप्रश्नाभिगमनंब्रह्मप्र
श्नानुशासनं।प्रादुर्भावश्चदुर्वासःसंवादश्चैवमायया।ततःपर्व्वपरिज्ञेयमानुशासनिकंपरं।स्वर्गारोहणि
कंचैवततोभीष्मस्यधीमतः।ततोश्वमेधिकंपर्व्वसर्व्वपापप्रणाशनं।अनुगीताततःपर्व्वज्ञेयमध्यात्मवाचकं
।पर्व्वचाश्रमवासाख्यंपुत्रदर्शनमेवच।नारदागमनंपर्व्वततःपरमिहोच्यते।मौशलंपर्व्वचोद्दिष्टंततोघोरंसु
दारुणं।महाप्रस्थानिकंपर्व्वस्वर्गारोहणिकंततः।हरिवंशस्ततःपर्व्वपुराणंखिलसंज्ञितं।विष्णुपर्व्वशिशो
श्चर्याविष्णोःकंसवधस्तथा।भविष्यंपर्व्वचाप्युक्तंखिलेचैवाद्भुतंमहत्।एतत्पर्व्वशतंपूर्णंव्यासेनोक्तंमहात्म

ना।यथावत्सूतपुत्रेणलोमहर्षणिनाततः।उक्तानिनैमिषारण्येपर्वाण्यष्टादशैवतु।समासोभारतस्याय
मत्रोक्तःपर्वसंग्रहः।पौष्यंपौलोममास्तीकमादिर्वंशावतारणं।संभवोजतुवेश्माख्यंहिडिंबवकयोर्वधः
।तथाचैत्ररथंदेव्याःपांचाल्याश्चस्वयंवरः।क्षात्रधर्मेणनिर्जित्यततोवैवाहिकंस्मृतं।विदुरागमनंचैवरा
ज्यलंभस्तथैवच।वनवासोर्ज्जुनस्यापिसुभद्राहरणंततः।हरणाहरणंचैवदहनंखांडवस्यच।मयस्यद
र्शनंचैवआदिपर्वणिकथ्यते।पौष्येपर्वणिमाहात्म्यमुत्तंकस्योपवर्णितं।पौलोमेभृगुवंशस्यविस्तारः
परिकीर्त्तितः।आस्तीकेसर्वनागानांगरुडस्यचसंभवः।क्षीरोदमथनंचैवजन्मोच्चैःश्रवसस्तथा।यजतः
सर्पसत्रेणराज्ञःपारीक्षितस्यच।कथेयमभिनिर्वृत्ताभारतानांमहात्मनां।विविधाःसंभवाराज्ञामुक्ताः
संभवपर्वणि।अन्येषांचैवशूराणामृषेर्द्वैपायनस्यच।अंशावतरणंचात्रदेवानांपरिकीर्त्तितं।दैत्यानांदा
नवानांचयक्षाणांचमहौजसां।नागानामथसर्पाणांगंधर्वाणांपतत्रिणां।अन्येषांचैवभूतानांविवि
धानांसमुद्भवः।महर्षेराश्रमपदेकण्वस्यचतपस्विनः।सकुंतलायांदुष्यंताद्भरतश्चापिजज्ञिवान्।
यस्यलोकेषुनाम्नेदंप्रथितंभारतंकुलं।वसूनांपुनरुत्पत्तिर्भागीरथ्यांमहात्मनां।शांतनोर्वेश्मनिपुनस्ते

र्षांचावारोहणंदिवि।तेजोंशानांचसंपातोभीष्मस्याप्यत्रसंभवः।राज्यान्निवर्त्तनंतस्यब्रह्मचर्यव्रतेस्थि
तिः।प्रतिज्ञापालनंचैवरक्षाचित्रांगदस्यच।हतेचित्रांगदेचैवरक्षाभ्रातुर्यवीयसः।विचित्रवीर्यस्यतथा
राज्येसंप्रतिपादनं।धर्मस्यनृषुसंभूतिरणीमांडव्यशापजा।कृष्णद्वैपायनाच्चैवप्रसूतिर्वरदानजा।धृ
तराष्ट्रस्यपांडोश्चपांडवानांचसंभवः।वारणावतयात्रायांमंत्रोदुर्योधनस्यच।हितोपदेशश्चपथिधर्म
राजस्यधीमतः।विदुरेणकृतोयत्रहितार्थंम्लेछभाषया।विदुरस्यचवाक्येनसुरुंगोपक्रमक्रिया॥
निषाद्याःपंचपुत्रायाःसुप्तायाजतुवेश्मनि।पुरोचनस्यचात्रैवदहनंसंप्रकीर्त्तितं।पांडवानांवनेघोरेहि
डिंबायाश्चदर्शनं।तत्रैवचहिडिंबस्यवधोभीमान्महाबलात।घटोत्कचस्यचोत्पत्तिरत्रैवपरिकीर्त्तिताम
हर्षेर्दर्शनंचैवव्यासस्यामिततेजसः।तदाज्ञयैकचक्रायांब्राह्मणस्यनिवेशने।अज्ञातचर्ययावासोयत्रतेषां
प्रकीर्त्तितः।वकस्यनिधनंचैवनागराणांचविस्मयः।संभवश्चैवकृष्णायाधृष्टद्युम्नस्यचैवह।ब्राह्मणात्स
मुपश्रुत्यव्यासवाक्यप्रचोदिताः।द्रौपदींप्रार्थयंतस्तेस्वयंवरदिदृक्षया।पांचालानभितोजग्मुर्यत्रकौतूह
लान्विताः।अंगारपर्णंनिर्जित्यगंगाकूलेर्जुनस्तदा।सख्यंकृत्वाततस्तेनतस्मादेवं सशुश्रुवे।तापत्यमथवा

सिष्टमौर्वचारव्यानमुत्तमं।पांचालनगरेचापिलक्ष्यंभित्वाधनंजयः।द्रौपदींलब्धवानत्रमध्येसर्वमहीक्षितां
।भीमसेनार्जुनौयत्रसंरब्धान्पृथिवीपतीन्।शल्यकर्णौचतरसाजितवंतौमहामृधे।दृष्ट्वातयोश्चतद्वीर्यम
प्रमेयममानुषं।शंकमानौपांडवांस्तान्रामकृष्णौमहामती।जग्मतुःतौसमागंतुंशालांभार्गववेश्मनि।पं
चानामेकपत्नीत्वेविमर्षोद्रुपदस्यच।पंचेंद्राणामुपाख्यानमत्रैवाद्भुतमुच्यते।द्रौपद्यादेवविहितोविवाहश्चा
प्यमानुषः।क्षत्तुश्चधृतराष्ट्रेणप्रेषणंपांडवान्प्रति।विदुरस्यचसंप्राप्तिर्दर्शनंकेशवस्यच।खांडवप्रस्थवा
सश्चतथाराज्यार्द्धसर्जनं।नारदस्याज्ञयाचैवद्रौपद्याःसमयक्रिया।सुंदोपसुंदयोस्तत्रतथाख्यानंपरि॰
कीर्तितं।अनंतरंचद्रौपद्यासहासीनंयुधिष्ठिरं।अनुप्रविश्यविप्रार्थेफाल्गुनोगृह्यचायुधं।मोक्षयित्वागृहं
गत्वाविप्रार्थंकृतनिश्चयः।समयंपालयन्वीरोवनंयत्रजगामह।पार्थस्यवनवासेचउलूप्यापथिसंगमः।
पुण्यतीर्थानुसंयानंबभ्रुवाहनजन्मच।तत्रैवमोक्षयामासपंचशोप्सरसःशुभाः।शापाद्ग्राहत्वमापन्नाब्राह्म
णस्यतपस्विनः।प्रभासतीर्थेपार्थस्यकृष्णेनचसमागमः।द्वारकायांसुभद्राचकामयानेनकामिनी।वासु
देवस्यानुमतेप्राप्ताचैवकिरीटिना।गृहीत्वाहरणंप्राप्तेकृष्णेदेवकिनंदने।अभिमन्योःसुभद्रायांजन्मचोत्त

मतेजसः।द्रौपद्यास्तनयानांचसंभवोत्रप्रकीर्त्तितः।विहारार्थंचगतयोःकृष्णयोर्यमुनामनु।संप्राप्तिश्चक्र
धनुषोःखांडवस्यचदाहनं।मयस्यमोक्षोज्वलनाद्भुजंगस्यचमोक्षणं।महर्षेर्मंदपालस्यशार्ङ्ग्यांतनयसंभव
ः।इत्येतदादिपर्वोक्तंप्रथमंवहुविस्तरं।अध्यायानांशतेद्वेतुसंख्यातेपरमर्षिणा।सप्तविंशतिरध्यायाव्या
सेनोत्तमतेजसा।अष्टौश्लोकसहस्राणि।अष्टौश्लोकशतानिच।श्लोकाश्चचतुराशीतिर्मुनिनोक्तामहात्मना।
द्वितीयंतुसभापर्ववहुवृत्तांतमुच्यते।सभाक्रियापांडवानांकिंकराणांचदर्शनं।लोकपालसभाख्यानंना
रदाद्देवदर्शिनः।राजसूयस्यचारंभोजरासंधवधस्तथा।गिरिव्रजेनिरुद्धानांराज्ञांकृष्णेनमोक्षणंतथा
दिग्विजयोत्रैवपांडवानांप्रकीर्त्तितः।राज्ञामागमनंचैवसार्हणानांमहाक्रतौ।राजसूयेर्घसंवादेशिशुपालव
धस्तथा।यज्ञेविभूतिंतांदृष्ट्वादुःखामर्षान्वितस्यच।दुर्योधनस्यावहासोभीमेनचसभातले।यत्रास्यमन्युरुद्भू
तोयेनद्यूतमकारयत्।यत्रधर्मसुतंद्यूतेशकुनिःकितवोजयत्।यत्रद्यूतार्णवेमग्नांद्रौपदींनौरिवार्णवात्॥
धृतराष्ट्रोमहाप्राज्ञःस्नुषांपरमदुःखितां।तारयामासतांस्तीर्णान्ज्ञात्वादुर्योधनोनृपः।पुनरेवततोद्यूते
समाह्वयतपांडवान्।जित्वासवनवासायप्रेषयामासतांस्ततः।एतत्सर्वंसभापर्वसमाख्यातंमहात्मना॥

अध्यायाः सप्ततिर्ज्ञेया स्तथाष्टौ चात्र संख्यया। श्लोकानां द्वे सहस्रे तु पंच श्लोकशतानि च। श्लोकाश्चैकादश
ज्ञेयाः पर्व्वण्यस्मिन्द्विजोत्तमाः। अतः परं तृतीयं तु ज्ञेयमारण्यकं महत्। वनवासं प्रयातेषु पांडवेषु महात्मसु
। पौरानुगमनं चैव धर्मपुत्रस्य धीमतः। अन्नौषधीनां च कृते पांडवेन महात्मना। द्विजानां भरणार्थं च कृतमा
राधनं रवेः। धौम्योपदेशात्तिग्मांशुप्रसादादन्नसंभवः। हितं च ब्रुवतः क्षत्तुः परित्यागोंबिकासुतात्। त्यक्तस्य
पांडुपुत्राणां समीपगमनं तथा। पुनरागमनं चैव धृतराष्ट्रस्य शासनात्। कर्णप्रोत्साहनाच्चैव धार्त्तराष्ट्रस्य
दुर्मतेः। वनस्थान्पांडवान्हंतुं मंत्रो दुर्योधनस्य च। तं दुष्टभावं विज्ञाय व्यासस्यागमनं द्रुतं। निर्याणप्रतिषेध
श्च सुरभ्याख्यानमेव च। मैत्रेयागमनं चात्र राज्ञश्चैवानुशासनं। शापोत्सर्गश्च तेनैव राज्ञो दुर्योधनस्य च। किर्मी
रस्य वधश्चात्र भीमसेनेन संयुगे। वृष्णीनामागमश्चात्र पांचालानां च सर्व्वशः। श्रुत्वा शकुनिना द्यूते निकृत्या
निर्जितांश्च तान्। क्रुद्धस्यानुप्रशमनं हरेश्चैव किरीटिना। परिदेवनं च पांचाल्या वासुदेवस्य संन्निधौ। आश्वास
नं च कृष्णेन दुःखार्त्तायाः प्रकीर्त्तितं। तथा सौभवधाख्यानमत्रैवोक्तं महर्षिणा। सुभद्रायाः सपुत्रायाः कृष्णे
न द्वारकां पुरीं। नयनं द्रौपदेयानां धृष्टद्युम्नेन चैव हि। प्रवेशः पांडवेयानां रम्ये द्वैतवने ततः। धर्मराजस्य च

त्रैवसंवादःकृष्णयासह।संवादश्चतथाराज्ञाभीमस्यापिप्रकीर्त्तितः।समीपंपांडुपुत्राणांव्यासस्यागमनंतथा।
प्रतिस्मृत्याथविद्यायादानंराज्ञेमहर्षिणा।गमनंकाम्यकेचापिव्यासेप्रतिगतेततः।अस्त्रहेतोर्विवासश्चपार्थ
स्यामिततेजसः।महादेवेनयुद्धंचकिरातवपुषासह।दर्शनंलोकपालानामस्त्रप्राप्तिस्तथैवच।महेंद्रलोकग
मनमस्त्रार्थेचकिरीटिनः।यत्रचिंतासमुत्पन्नाधृतराष्ट्रस्यभूयसी।दर्शनंबृहदश्वस्यमहर्षेर्भावितात्मनः।यु
धिष्ठिरस्यचार्त्तस्यव्यसनेपरिदेवनं।नलोपाख्यानमत्रैवधर्मिष्टंकरुणोदयं।दमयंत्याःस्थितिर्यत्रनलस्यच
रितंतथा।तथाक्षहृदयप्राप्तिस्तस्मादेवमहर्षितः।लोमशस्यागमस्तत्रस्वर्गात्पांडुसुतान्प्रति।वनवासगतानां
चपांडवानांमहात्मनां।स्वर्गेप्रवृत्तिराख्यातालोमशेनार्जुनस्यवै।संदेशादर्जुनस्यात्रतीर्थाभिगमनक्रिया।
तीर्थानांचफलप्राप्तिःपुण्यत्वंचापिकीर्त्तितं।पुलस्त्यतीर्थयात्राचनारदेनमहर्षिणा।तीर्थयात्राचतत्रैवपांड
वानांमहात्मनां।तथायज्ञविभूतिश्चगयस्यात्रप्रकीर्त्तिता।आगस्त्यमपिचाख्यानेयत्रवातापिभक्षणं।लोपा
मुद्राभिगमनंमपत्यार्थंऋषेस्तथा।ऋष्यशृंगस्यचरितंकौमारब्रह्मचारिणः।जामदग्न्यस्यरामस्यचरितंभूरि
तेजसः।कार्त्तवीर्यवधोयत्रहैहयानांचवर्ण्यते।प्रभासतीर्थेपांडूनांवृष्णिभिश्चसमागमः।सौकन्यमपिचा

ख्यानंच्यवनोयत्रभार्गवः।शार्यातियज्ञेनासत्यौकृतवान्सोमपीतिनौ।ताभ्यांचयत्रसमुनिर्यौवनंप्रतिपा
दितः।मांधातुश्चाप्युपाख्यानंराज्ञोत्रैवप्रकीर्त्तितं।जंतूपाख्यानमत्रैवयत्रपुत्रेणसोमकः।पुत्रार्थमयज
द्राजालेभेपुत्रशतंचसः।ततःश्येनकपोतीयमुपाख्यानमनुत्तमं।इंद्राग्नीयत्रधर्म्मश्चाप्यऽजिज्ञासंछि
विंनृपं।अष्टावक्रीयमत्रैवविवादोयत्रवंदिना।अष्टावक्रस्यविप्रर्षेर्जनकस्याध्वरेभवत्।नैयायिकानांमु
ख्येनवरुणस्यात्मजेनच।पराजितोयत्रवंदीविवादेनमहात्मना।विजित्यसागरंप्राप्तंपितरंलब्धवानृषि
ः।यवक्रीतस्यचाख्यानंरैभ्यस्यचमहात्मनः।गंधमादनयात्राचवासोनारायणाश्रमे।नियुक्तोभीमसेन
श्चद्रौपद्यागंधमादने।व्रजन्पथिमहाबाहुर्दृष्टवान्पवनात्मजं।कदलीखंडमध्यस्थंहनूमंतंमहाबलं।यत्र
सौगंधिकार्थेसौनलिनींतामधर्षयत्।यत्रास्ययुद्धमभवत्सुमहद्राक्षसैःसह।यक्षैश्चैवमहावीर्यैर्मणि
मत्प्रमुखैस्तथा।जटासुरस्यचवधोराक्षसस्यवृकोदरात्।वृषपर्व्वणोराजर्षेस्ततोभिगमनंस्मृतं।आर्ष्टिषे
णाश्रमेचैषांगमनंवासएवच।प्रोत्साहनंचपांचाल्याभीमस्यात्रमहात्मनः।कैलासारोहणंप्रोक्तंयत्रयक्षै
र्बलोत्कटैः।युद्धमासीन्महाघोरंमणिमत्प्रमुखैःसह।समागमश्चपांडूनांयत्रवैश्रवणेनच।समागमश्चा

र्जुनस्यतत्रैवभ्रातृभिःसह।निवातकवचैर्घोरैर्दानवैःसुरशत्रुभिः।पौलोमैःकालकेयैश्चयत्रयुद्धंकिरी
टिनः।वधश्चैषांसमाख्यातोराज्ञस्तेनैवधीमता।अस्त्रसंदर्शनारंभोधर्मराजस्यसन्निधौ।पार्थस्यप्रति
षेधश्चनारदेनसुरर्षिणा।अवरोहणंपुनश्चैवपांडूनांगंधमादनात्।भीमस्यग्रहणंचात्रपर्वताभोगवर्ष्मि
णा।भुजगेंद्रेणबलिनातस्मिन्सुगहनेवने।अमोक्षयद्यत्रचैनंप्रश्नानुक्त्वायुधिष्ठिरः।काम्यकागमनं
चैवपुनस्तेषांमहात्मनां।तत्रस्थांश्चपुनर्द्रष्टुंपांडवान्पुरुषर्षभान्।वासुदेवस्यागमनमत्रैवपरिकीर्त्तितं।
मार्कंडेयसमस्यायामुपाख्यानानिसर्वशः।पृथोर्वैन्यस्ययत्रोक्तमाख्यानंपरमर्षिणा।संवादश्चसर
स्वत्यास्तार्क्ष्यर्षेःसुमहात्मनः।मत्स्योपाख्यानमत्रैवप्रोच्यतेतदनंतरं।मार्कंडेयसमस्याचपुराणंपरि
कीर्त्यते।ऐंद्रद्युम्नमुपाख्यानंधौंधुमारंतथैवच।पतिव्रतायाश्चाख्यानंतथैवांगिरसंस्मृतं।द्रौपद्याःकीर्ति
तश्चात्रसंवादःसत्यभामया।पुनर्द्वैतवनंचैवपांडवाःसमुपागताः।घोषयात्राचगंधर्वैर्यत्रबद्धःसुयोधनः।
ह्रियमाणस्तुमंदात्मामोक्षितोसौकिरीटिना।धर्मराजस्यचात्रैवमृगस्वप्ननिदर्शनात्।काम्यकेकाननश्रे
ष्ठेपुनर्दर्शनमुच्यते।व्रीहिद्रौणिकमाख्यानमत्रैववकु[illegible]विस्तरं।जयद्रथेनापहारोद्रौपद्याश्चाश्रमात्

रात्।यत्रैनमन्वयाद्भीमोवायुवेगसमोजवे।चक्रेचैनंपंचशिखंयत्रभीमोमहाबलः।रामायणमुपाख्यान
मत्रैवबहुविस्तरं।यत्ररामेणविक्रम्यनिहतोरावणोयुधि।सावित्र्याश्चाप्युपाख्यानमत्रैवपरिकीर्त्तितं।
कर्णस्यपरिमोक्षोत्रकुंडलाभ्यांपुरंदरात्।यत्रास्यशक्तिंतुष्टोदादेकवीरवधायच।आरणेयमुपाख्यानंय
त्रधर्मोन्वशात्सुतं।जग्मुर्लब्धवरायत्रपांडवाःपश्चिमांदिशं।एतदारण्यकंपर्वतृतीयंपरिकीर्त्तितं।अत्राध्या
यशतेद्वेतुसंख्ययापरिकीर्त्तिते।एकोनसप्ततिश्चैवतथाध्यायाःप्रकीर्त्तिताः।एकादशसहस्राणिश्लोका
नांषट्शतानिच।चतुःषष्टिस्तथाश्लोकाःपर्वण्यस्मिन्प्रकीर्त्तिताः।अतःपरंनिबोधेदंवैराटंपर्वविस्तरं।
विराटनगरंगत्वाश्मशानेविपुलांशमीं।दृष्ट्वासन्निदधुस्तत्रपांडवाह्यायुधान्युत।यत्रप्रविश्यनगरंछद्मना
न्यवसंस्तुते।पांचालीप्रार्थयानस्यकामोपहतचेतसः।दुष्टात्मनोवधोयत्रकीचकस्यवृकोदरात्।पांडवा
न्वेषणार्थंचराज्ञोदुर्योधनस्यच।चराःप्रस्थापितास्तत्रनिपुणाःसर्वतोदिशं।नचप्रवृत्तिस्तैर्लब्धापांडवा
नांमहात्मनां।गोग्रहश्चविराटस्यत्रिगर्त्तैःप्रथमंकृतः।यत्रास्ययुद्धंसुमहत्तैरासीत्लोमहर्षणं।ह्रियमाण
श्चयत्रासौभीमसेनेनमोक्षितः।गोधनंचविराटस्यमोक्षितंयत्रपांडवैः।अनन्तरंचकुरुभिस्तस्यगोग्रहणं

कृतांसमस्तायत्रपार्थेननिर्ज्जिताःकुरवोयुधि।प्रत्याहृतंगोधनंचविक्रमेणकिरीटिना।विराटेनोत्तरा
दत्तास्नुषायत्रकिरीटिनः।अभिमन्युंसमुद्दिश्यसौभद्रमरिघातिनं।चतुर्थमेतद्विपुलंवैराटंपर्ववर्णि
तं।अत्रापिपरिसंख्याताअध्यायाःपरमर्षिणा।सप्तषष्टिरथोपूर्णाश्लोकानामपिमेशृणु।श्लोकानां
द्वेसहस्रेतुश्लोकाःपंचाशदेवतु।उक्तानिवेदविदुषापर्वण्यस्मिन्महर्षिणा।उद्योगपर्वविज्ञेयंपंचमं
शृण्वतःपरं।उपप्लव्येनिविष्टेषुपांडवेषुजिगीषया।दुर्योधनोर्ज्जुनश्चैववासुदेवमुपस्थितौ।साहाय्य
मस्मिन्समरेभवान्नौकर्त्तुमर्हति।इत्युक्तेवचनेकृष्णोयत्रोवाचमहामतिः।अयुध्यमानमात्मानंमंत्रि
णंपुरुषर्षभौ।अक्षौहिणींवासैन्यस्यकस्यकिंवाददाम्यहं।वव्रेदुर्योधनःसैन्यंमंदात्मायत्रदुर्मतिः।
अयुध्यमानंसचिवंवव्रेकृष्णंधनंजयः।मद्रराजंचराजानमायान्तंपांडवान्प्रति।उपहारैर्वंचयित्वावर्त्म
न्येवसुयोधनः।वरदंतंवरंवव्रेसाहाय्यंक्रियतांमम।शल्यस्तस्मैप्रतिश्रुत्यजगामोद्दिश्यपांडवान्।
सांत्वपूर्वंत्वकथयद्यत्रेंद्रविजयंनृपः।पुरोहितप्रेषणंचपांडवैःकौरवान्प्रति।तथेंद्रविजयंचापि
यानंचैवपुरोधसः।संजयंप्रेषयामासशमार्थीपांडवान्प्रति।यत्रदूतंमहाराजोधृतराष्ट्रःप्रताप

वान्।श्रुत्वाचपांडवान्यत्रवासुदेवपुरोगमान्।प्रजागरःसंप्रजज्ञेधृतराष्ट्रस्यचिंतया।विदुरोयत्रवाक्या
निविचित्राणिहितानिच।श्रावयामासराजानंधृतराष्ट्रंमनीषिणं।तथासनत्सुजातेनयत्राध्यात्ममनु
त्तमं।मनस्तापान्वितोराजाश्रावितःशोकलालसः।प्रभातेराजसमितौसंजयोयत्रवाविभो।एकात्म्य
वासुदेवस्यप्रोक्तवानर्जुनस्यच।यत्रकृष्णोदयापन्नःसंधिमिछन्महामतिः।स्वयमागच्छमंकर्तुंनगरं
नागसाह्वयं।प्रत्याख्यानंचकृष्णस्यराज्ञादुर्योधनेनवै।शमार्थेयाचमानस्यपक्षयोरुभयोर्हितं।दंभो
द्भवस्यचाख्यानमत्रैवपरिकीर्त्तितं।वरान्वेषणमत्रैवमातलेश्चमहात्मनः।महर्षेश्चापिकथितंचरितं
गालवस्यवै।विदुलायाश्चपुत्रस्यप्रोक्तंचाप्यनुशासनं।कर्णदुर्योधनादीनांदुष्टंविज्ञायमंत्रितं।योगेश्व
रत्वंकृष्णेनयत्रराज्ञांप्रदर्शितं।रथमारोप्यकृष्णेनयत्रकर्णोनुमंत्रितः।उपायपूर्वंशौंडीर्यात्प्रत्याख्यात
श्चतेनसः।आगम्यहास्तिनपुरादुपप्लव्यमरिंदमः।पांडवानांयथावृत्तंसर्वमाख्यातवान्हरिः।तेतस्यवच
नंश्रुत्वामंत्रयित्वाचयद्धितं।सांग्रामिकंततःसर्वंसज्जंचक्रुःपरंतपाः।ततोयुद्धायनिर्जातानराश्वरथदं
तिनः।नगराद्धास्तिनपुराद्बलसंख्यानमेवच।यत्रराज्ञाह्युलूकस्यप्रेषणंपांडवान्प्रति।श्वोभाविनिमहा

युद्धेदूत्येनकृतवान्प्रभुः।रथातिरथसंख्यानमंबोपाख्यानमेवच।एतत्सुबहुवृत्तांतंपंचमंपर्व्वभारते।उद्यो
गपर्व्वनिर्द्दिष्टंसंधिविग्रहमिश्रितं।अध्यायानांशतंप्रोक्तंषडशीतिर्महर्षिणा।श्लोकानांषट्सहस्राणि
तावंत्येवशतानिच।श्लोकाश्चनवतिःप्रोक्तास्तथैवाष्टौमहात्मना।व्यासेनोदारमतिनापर्व्वण्यस्मिंस्तपो
धनाः।अतःपरंविचित्रार्थंभीष्मपर्व्वप्रचक्षते।जंबूखंडविनिर्माणंयत्रोक्तंसंजयेनह।अत्रयौधिष्ठिरंसैन्यंवि
षादमगमत्परं।यत्रयुद्धमभूद्घोरंदशाहानिसुदारुणं।कश्मलंयत्रपार्थस्यवासुदेवोमहामतिः।मोहजं
नाशयामासहेतुभिर्म्मोक्षदर्शिकैः।समीक्ष्याधोक्षजःक्षिप्रंयुधिष्ठिरहितेरतः।रथादाप्लुत्यवेगेनस्वयं
कृष्णउदारधीः।प्रतोदपाणिराधावद्भीष्मंहंतुंव्यपेतभीः।वाक्यप्रतोदाभिहतोयत्रकृष्णेनपांडवः।गां
डीवधन्वासमरेसर्व्वशस्त्रभृतांवरः।शिखंडिनंपुरस्कृत्ययत्रपार्थोमहाधनुः।विनिघ्नन्निशितैर्बाणैरथाद्भी
ष्ममपातयत्।शरतल्पगतश्चैवभीष्मोयत्रबभूवह।षष्ठमेतत्समाख्यातंभारतेपर्व्वविस्तृतं।अध्यायानां
शतंप्रोक्तंतथासप्तदशापरे।पंचश्लोकसहस्राणिसंख्याचाष्टौशतानिच।श्लोकाश्चचतुराशीतिरस्मिन्
पर्व्वणिकीर्त्तिताः।व्यासेनवेदविदुषासंख्याताभीष्मपर्व्वणि।द्रोणपर्व्वततश्चित्रंबहुवृत्तांतमुच्यते।सेना

पत्येभिषिक्तोथयत्राचार्यःप्रतापवान्।दुर्योधनस्यप्रीत्यर्थंप्रतिजज्ञेमहास्त्रवित्।ग्रहणंधर्मराजस्यपां
डुपुत्रस्यधीमतः।यत्रसंसप्तकाःपार्थमपनिन्यूरणाजिरात्।भगदत्तोमहाराजोयत्रशक्रसमोयुधि।सु
प्रतीकेननागेनसहशांतःकिरीटिना।यत्राभिमन्युंबहवोजघ्नुरेकंमहारथाः।जयद्रथमुखाबालंशूरम
प्राप्तयौवनं।हतेभिमन्यौक्रुद्धेनयत्रपार्थेनसंयुगे।अक्षौहिणीःसप्तहत्वाहतोराजाजयद्रथः।यत्रभीमो
महाबाहुःसात्यकिश्चमहारथः।अन्वेषणार्थंपार्थस्ययुधिष्ठिरनृपाज्ञया।प्रविष्टौभारतींसेनामप्रधृ
ष्यांसुरैरपि।संसप्तकावशेषंचकृतंनिःशेषमाहवे।अलंबुषःश्रुतायुश्चजलसंधश्चवीर्यवान्।सोम
दत्तिर्विराटश्चद्रुपदश्चमहारथः।घटोत्कचादयश्चान्येनिहताद्रोणपर्वणि।अश्वत्थामापिचात्रैवद्रोणेयु
धिनिपातिते।अस्त्रंप्रादुश्चकारोग्रंनारायणममर्षणः।आग्नेयंकीर्त्यतेयत्ररुद्रमाहात्म्यमुत्तमं।व्यासस्य
चाप्यागमनंमाहात्म्यंकृष्णपार्थयोः।सप्तमंभारतेपर्वमहदेतदुदाहृतं।यत्रतेपृथिवीपालाःप्रायशोनिधनं
गताः।द्रोणपर्वणियेशूराःनिर्दिष्टाःपुरुषर्षभाः।अत्राध्यायशतंप्रोक्तंतथाध्यायाश्चसप्ततिः।अष्टौश्लो
कसहस्राणितथानवशतानिच।श्लोकानवतथैवात्रसंख्यातास्तत्त्वदर्शिना।पाराशर्येणमुनिनासंचिं

त्यद्रोणपर्व्वणि।अतःपरंकर्णपर्व्वप्रोच्यतेपरमाद्भुतं।सारथ्येविनियोगश्चमद्रराजस्यधीमतः।आख्यातं
यत्रपौराणंत्रिपुरस्यनिपातनं।प्रयाणेपरुषश्चात्रसंवादःकर्णशल्ययोः।हंसकाकीयमाख्यानंतत्रैवाक्षे
पसंहितं।वधःपांड्यस्यचतथाअश्वत्थाम्नामहात्मना।दंडसेनस्यचवधोदंडस्यचवधस्तथा।द्वैरथेयत्रक
र्णेनधर्मराजयुधिष्ठिरः।संशयंगमितोयुद्धेमिषतांसर्वधन्विनां।अन्योन्यंप्रतिचक्रोधोयुधिष्ठिरकिरीटि
नोः।यत्रैवानुनयःप्रोक्तोमाधवेनार्जुनस्यवै।प्रतिज्ञापूर्वकंचापिवक्षोदुःशासनस्यच।भित्वावृकोदरोरक्तं
पीतवान्यत्रसंयुगे।द्वैरथेयत्रपार्थेनहतःकर्णोमहारथः।अष्टमंपर्व्वनिर्दिष्टमेतद्भारतचिंतकैः।एको
नसप्ततिःप्रोक्ताअध्यायाःकर्णपर्व्वणि।चत्वार्य्येवसहस्राणिनवश्लोकशतानिच।चतुःषष्टिस्तथाश्लो
काःपर्व्वण्यस्मिन्प्रकीर्त्तिताः।अतःपरंविचित्रार्थंशल्यपर्व्वप्रकीर्त्तितं।हतप्रवीरेसैन्येतुनेतामद्रेश्वरोभव
त्।वृत्तानिरथयुद्धानिकीर्त्यंतेयत्रभागशः।विनाशःकुरुमुख्यानांशल्यपर्व्वणिकीर्त्यते।शल्यस्यनिधनं
चात्रधर्मराजान्महात्मनः।शकुनेश्चवधोत्रैवसहदेवेनसंयुगे।सैन्येचहतभूयिष्ठेकिंचिच्छिष्टेसुयोधनः।
ह्रदंप्रविश्ययत्रासौसंस्तभ्यापोव्यवस्थितः।प्रवृत्तिस्तत्रचाख्यातायत्रभीमस्यलुब्धकैः।क्षेपयुक्तैर्वचो

भिश्च धर्मराजस्यधीमतः। ह्रदात्समुत्थितो यत्र धार्त्तराष्ट्रोह्यमर्षणः। गदायुद्धंचतुमुलमत्रैवपरिकीर्त्तितं।
दुर्योधनस्यराज्ञोथयत्र भीमेनसंयुगे। ऊरूभग्नौ प्रसह्याजौगदयाभीमवेगया। नवमंपर्व्वनिर्द्दिष्टमेतदद्भुत
मर्थवत्। एकोनषष्ठिरध्यायाः पर्व्वण्यत्रप्रकीर्त्तिताः। संख्यातावहुवृत्तांताः श्लोकसंख्यात्रकथ्यते। त्रीणिश्लो
कसहस्राणिद्वेशतेविंशतिस्तथा। मुनिनासंप्रणीतानिकौरवाणांयशोभृता। अतःपरंप्रवक्ष्यामिसौप्तिकं
पर्व्वदारुणं। भग्नोरुंयत्रराजानंदुर्योधनममर्षणं। अपयातेषुपार्थेषुत्रयस्तेभ्याययूरथाः। कृतवर्म्मा
कृपोद्रौणिःसायाह्ने रुधिरोक्षितं। समेत्यददृशुर्भूमौपतितंरणमूर्द्धनि। प्रतिजज्ञेदृढक्रोधोद्रौणिर्यत्रम
हारथः। अहत्वासर्वपांचालान्धृष्टद्युम्नपुरोगमान्। पांडवांश्चसहामात्यान्नविमोक्ष्यामिदंशनं। यत्रैवमुक्त्वा
राजानमपक्रम्यत्रयोरथाः। सूर्यास्तमनवेलायामासेदुस्तेमहद्वनं। न्यग्रोधस्यात्रमहतोयत्राधस्तादुपव
स्थिताः। ततःकाकान्वहून्रात्रौदृष्ट्वोलूकेनहिंसितान्। द्रौणिःक्रोधसमाविष्टःपितुर्वधमनुस्मरन्। पांचा
लानांप्रसुप्तानांवधंप्रतिमनोदधे। गत्वाचशिविरद्वारिदुर्द्दर्शंतत्रराक्षसं। घोररूपमपश्यत्सदिवमावृत्य
धिष्ठितं। तेनव्याघातमस्त्राणांक्रियमाणमवेक्ष्यच। द्रौणिर्यत्रविरूपाक्षंरुद्रमाराध्यसत्वरः। प्रसुप्ता

शिखंडी विशिष्टस्तान्धृष्टद्युम्नपुरोगमान्।पांचालान्सपरीवारान्द्रौपदेयांश्च सर्वशः।कृतवर्मणा च सहितः
कृपेण च निजघ्निवान्।यत्रामुच्यंत ते पार्थाः पंच कृष्णबलाश्रयात्।सात्यकिश्च महेष्वासः शेषाश्च निधनं
गताः।पांचालानां प्रसुप्तानां यत्र द्रोणसुताद्वधः।धृष्टद्युम्नस्य सूतेन पांडवेषु निवेदितः।द्रौपदी पुत्रशो
कार्त्ता पितृभ्रातृवधार्द्दिता।कृतानशनसंकल्पा यत्र भर्तॄनुपाविशत्।द्रौपदीवचनाद्यत्र भीमो भीमप
राक्रमः।प्रियं तस्याश्चिकीर्षन्वै गदामादाय वीर्यवान्।अन्वधावत्सुसंक्रुद्धो भारद्वाजं गुरोः सुतं।भीमसे
नभयाद्यत्र दैवेनाभिप्रचोदितः।अपांडवायेति रुषा द्रौणिरस्त्रमवासृजत्।मैवमित्यब्रवीत्कृष्णः शम
यंस्तस्य तद्वचः।यत्रास्त्रमस्त्रेण च तच्छमयामास फाल्गुनः।द्रौणेश्च द्रोहबुद्धित्वं वीक्ष्य पापात्मनस्तदा।द्रौ
णिद्वैपायनादीनां शापाश्चान्योन्यकारिताः।मणिं तथा समादाय द्रोणपुत्रान्महारथात्।पांडवाः प्रददुर्हृ
ष्टा द्रौपद्यै जितकाशिनः।एतद्वै दशमं पर्व सौप्तिकं समुदाहृतं।अष्टादशास्मिन्नध्यायाः पर्वण्युक्ता महा
त्मना।श्लोकानां कथितान्यत्र शतान्यष्टौ प्रसंख्यया।श्लोकाश्च सप्ततिः प्रोक्ता मुनिना ब्रह्मवादिना।सौ
प्तिकैषीकसंबद्धे पर्वण्युत्तमतेजसा।अत ऊर्ध्वमिदं प्राहुः स्त्रीपर्व करुणोदयं।पुत्रशोकाभिसंतप्तः

प्रज्ञाचक्षुर्नराधिपः।कृष्णोपनीतांयत्रासावायसींप्रतिमांदृढां।भीमसेनंद्रोहबुद्धिर्धृतराष्ट्रोवभंजह।तथा
शोकाभितप्तस्यकौरवायोधनंप्रति।सांतःपुरस्यगमनंशोकार्त्तस्यप्रकीर्त्तितं।विलापोवीरपत्नीनांयत्रातिक
रुणःस्मृतः।क्रोधावेशःप्रमोहश्चगांधारीधृतराष्ट्रयोः।यत्रतान्क्षत्रियान्शूरान्संग्रामेष्वनिवर्त्तिनः।पुत्रान्
भ्रातॄन्पितॄंश्चैवददृशुर्निहतान्रणे।पुत्रपौत्रवधार्त्तायास्तथात्रैवप्रकीर्त्तिता।गांधार्य्याश्चापिकृष्णेनक्रोधो
पशमनक्रिया।यत्रराजामहाप्राज्ञःसर्वधर्मभृतांवरः।राज्ञांतानिशरीराणिदाहयामासशास्त्रतः।तो
यकर्मणिचारब्धेराज्ञामुदकदानिके।गूढोत्पन्नस्यचाख्यानंकर्णस्यपृथयात्मनः।सुतस्यैतदिहप्रोक्तं
व्यासेनपरमर्षिणा।एतदेकादशंपर्वशोकवैक्लव्यकारकं।प्रणीतंसज्जनमनोवैक्लव्याश्रुप्रवर्त्तकं।स
प्तविंशतिरध्यायाःपर्वण्यस्मिन्प्रकीर्त्तिताः।श्लोकसप्तशतीचापिपंचसप्ततिसंयुता।संख्ययाभारता
ख्यानमुक्तंव्यासेनधीमता।अतःपरंशांतिपर्वद्वादशंबुद्धिवर्द्धनं।यत्रनिर्वेदमापन्नोधर्मराजोयुधिष्ठि
रः।घातयित्वापितॄन्भ्रातॄन्पुत्रान्संबंधिमातुलान्।शांतिपर्वणिधर्माश्चव्याख्याताःशारतल्पिकाः।राज
भिर्वेदितव्यास्तेसम्यग्ज्ञानबुभुत्सुभिः।आपद्धर्माश्चतत्रैवकालहेतुप्रदर्शिनः।यान्बुद्ध्वापुरुषःसम्यक्

सर्वज्ञत्वमवाप्नुयात्।मोक्षधर्माश्चकथिताविचित्रावहुविस्तराः।द्वादशंपर्वनिर्दिष्टमेतत्प्राज्ञजनप्रियं।
अत्रपर्वणिविज्ञेयमध्यायानांशतत्रयं।त्रिंशच्चैवतथाध्यायानववैवतपोधनाः।चतुर्दशसहस्राणि
तथासप्तशतानिच।सप्तश्लोकास्तथैवात्रपाराशर्येणधीमता।अतऊर्ध्वंतुविज्ञेयमनुशासनमुत्तमं।
यत्रप्रकृतिमापन्नःश्रुत्वाधर्मविनिश्चयं।भीष्माद्भागीरथीपुत्रात्कुरुराजोयुधिष्ठिरः।व्यवहारोत्रका
र्त्स्न्येनधर्मार्थीयःप्रकल्पितः।विविधानांचदानानांफलयोगाःपृथग्विधाः।तथापात्रविशेषाश्चदाना
नांचपरोविधिः।आचारविधियोगश्चसत्यस्यचपरागतिः।महाभाग्यंगवांचैवव्राह्मणानांतथैवच।
रहस्यंचैवधर्माणांदेशकालोपसंहितं।एतत्सुवहुवृत्तान्तमुत्तमंचानुशासनं।भीष्मस्यात्रैवसंप्राप्तिःस्व
र्गस्यपरिकीर्त्तिताः।एतत्त्रयोदशंपर्वधर्मनिश्चयकारकं।अध्यायानांशतंत्वत्रषट्चत्वारिंशदेवतु।श्लो
कानांतुसहस्राणिप्रोक्तान्यष्टौप्रसंख्यया।ततोश्वमेधिकंनामपर्वप्रोक्तंचतुर्दशं।तत्संवर्त्तमरुत्तीयंयत्रा
ख्यान - मुत्तमं।सुवर्णकोषसंप्राप्तिर्जन्मचोक्तंपरीक्षितः।दग्धस्यास्त्राग्निनापूर्वंकृष्णात्संजीवनंपुनः।च
र्यायांहयमुत्सृष्टंपांडवस्यानुगच्छतः।तत्रतत्रचयुद्धानिराजपुत्रैरमर्षणैः।चित्रांगदायाःपुत्रेणपुत्रिकायाध

नंजयः। संग्रामेवभ्रुवाहेन संशयंचात्रदर्शितः। सुदर्शनंतथाख्यानं वैलवंधर्म्ममेवच। अश्वमेधेमहायज्ञेनकु
लाख्यानमेवच। इत्याश्वमेधिकंपर्व्वप्रोक्तमेतन्महाद्भुतं। अत्राध्यायशतंत्रिंशत्त्रयोध्यायाश्चशब्दिताः। त्री
णिश्लोकसहस्राणितावंत्येवशतानिच। विंशतिश्चतथाश्लोकाः संख्यातास्तत्वदर्शिना। ततस्त्वाश्रमवास
ख्यंपर्व्वपंचदशंस्मृतं। यत्रराज्यंसमुत्सृज्यगांधार्य्यासहितोनृपः। धृतराष्ट्राश्रमपदं विदुरश्चजगामह। यंदृष्ट्वा
प्रस्थितंसाध्वीपृथाप्यनुययौतदा। पुत्रराज्यंपरित्यज्यगुरुशुश्रूषणेरता। यत्रराजाहतान्पुत्रान्पौत्रानन्यांश्च
पार्थिवान्। लोकांतरगतान्वीरानपश्यत्पुनरागतान्। ऋषेः प्रसादात्कृष्णस्यदृष्ट्वाश्चर्यमनुत्तमं। त्यक्त्वाशो
कंसदारश्चसिद्धिंपरमिकांगतः। यत्रधर्मंसमाश्रित्यविदुरः स्वर्गतिंगतः। संजयश्चमहामात्रोविद्वान्गाव
ल्गणिर्वशी। ददर्शनारदंयत्रधर्मराजोयुधिष्ठिरः। नारदाच्चैवशुश्रावदृष्णीनांकदनंमहत्। एतदाश्रमवा
ख्यानंपर्व्वोक्तंसुमहाद्भुतं। द्विचत्वारिंशदध्यायंपर्व्वैतदभिसंख्यया। सहस्रमेकंश्लोकानांपंचश्लोकशता
निच। षडेवचतथाश्लोकाः संख्यातास्तत्वदर्शिना। अतः परंनिबोधेदंमौशलंभृशदारुणं। यत्रतेपुरुषव्या
घ्राः शस्त्रस्पर्शहतायुधि। ब्रह्मदंडविनिष्पिष्टाः समीपेलवणांभसः। आपानेयानकलितादैवेनाभिप्र

चोदिताः।एरकारूपिणिर्वज्रैर्निजघ्नुरितरेतरं।यत्रसर्वक्षयंकृत्वातावुभौरामकेशवौ।नातिचक्रमतुःकालंप्रा
प्तंसर्वहरंमहत्।यत्रार्जुनोद्वारवतीमेत्यवृष्णिविनाकृतां।दृष्ट्वाविषादमगमत्परांचार्त्तिनरर्षभः।ससंस्कृत्य
यदुश्रेष्ठंमातुलंशौरिमात्मनः।दद्दर्शयदुवीराणामापानेवैशसंमहत्।शरीरंवासुदेवस्यरामस्यचमहा
त्मनः।संस्कारंलंभयामासवृष्णीनांचप्रधानतः।सवृद्धवालमादायद्वारवत्यास्ततोजनं।ददर्शापदिकष्टा
यांगांडीवस्यपराभवं।सर्वेषांचैवदिव्यानामस्त्राणामप्रसन्नतां।नाशंवृष्णिकलत्राणांप्रभावानामनित्यतां।
दृष्ट्वानिर्वेदमापन्नोव्यासवाक्यप्रचोदितः।धर्मराजंसमासाद्यसन्यासंसमरोचयत्।इत्येतन्मौशलंपर्व्वषो
डशंपरिकीर्त्तितं।अध्यायाष्टौसमाख्याताःश्लोकानांचशतत्रयं।श्लोकानांविंशतिश्चैवसंख्याताःतत्वद
र्शिना।महाप्रास्थानिकंतस्मादूर्ध्वंसप्तदशस्मृतं।यत्रराज्यंपरित्यज्यपांडवाःपुरुषर्षभाः।द्रोपद्यासहि
तादेव्यामहाप्रस्थानमास्थिताः।यत्रतेग्निंददृशिरेलौहित्यंप्राप्यसागरं।यत्राग्निनाचोदितश्चपार्थस्तस्मैम
हात्मने।ददौसंपूज्यतद्दिव्यंगांडीवंधनुरुत्तमं।यत्रभ्रातॄन्निपतितान्द्रोपदींचयुधिष्ठिरः।दृष्ट्वाहित्वाजगा
मेवसर्वाननवलोकयन्।एतत्सप्तदशंपर्व्वमहाप्रास्थानिकंस्मृतं।अत्राध्यायास्त्रयःप्रोक्ताःश्लोकानांचत्रि

तत्रयं।विंशतिश्चतथाश्लोकाःसंख्यातास्तत्वदर्शिना।स्वर्गपर्वततोज्ञेयंदिव्यंयत्तदमानुषं।प्राप्तंदेवरथं
स्वर्गान्नेष्टवान्यत्रधर्मराट्।आरोढुंसमहाप्राज्ञआनृशंस्याच्छुनाविना।तामस्याविचलांज्ञात्वास्थितिंध
र्म्मेमहात्मनः।स्वरूपंयत्रतत्यक्त्वाधर्म्मेणासौसमन्वितः।स्वर्गंप्राप्तःसचतथायातनाविपुलाभृशं।देव
दूतेननरकंयत्रव्याजेनदर्शितः।शुश्रावयत्रधर्म्मात्माभ्रातॄणांकरुणागिरः।निदेशेवर्त्तमानानांदेशे
तत्रैववर्त्ततां।अनुदर्शितश्चधर्म्मेणदेवराजेनपांडवः।आप्लुत्याकाशगंगायांदेहंत्यक्त्वासमानुषं।स्व
धर्मनिर्जितंस्थानंस्वर्गेप्राप्यसधर्मराट्।मुमुदेपूजितःसर्वैःसेंद्रैःसुरगणैःसह।एतदष्टादशंपर्वप्रोक्तं
व्यासेनधीमता।अध्यायाःपंचसंख्याताःपर्वण्येतस्मिन्महात्मना।श्लोकानांद्विशतेचैवप्रसंख्यातेतपोधनाः।
नवश्लोकास्तथैवान्येसंख्याताःपरमर्षिणा।अष्टादशैवमेतानिपर्व्वाण्युक्तान्यशेषतः।खिलेषुहरिवंशश्च
भविष्यंचप्रकीर्त्तितं।अत्रापिपरिसंख्यानंकथितंतत्वबुद्धिना।अध्यायानांसहस्रंतुकीर्त्तितंवैद्विजोत्तमाः।दश
श्लोकसहस्राणिविंशतश्लोकशतानिच।श्लोकाश्चचतुराशीतिर्हरिवंशेप्रकीर्त्तिताः।खिलेषुहरिवंशेचसंख्या
तानिमहात्मना।एतत्सर्वसमाख्यातंभारतंपर्वसंग्रहात्।अष्टादशसमाजग्मुरक्षौहिण्यायुयुत्सया।त

न्महद्दारुणंयुद्धमहान्यष्टादशाभवत्।।योविद्याच्चतुरोवेदान्सांगोपनिषदान्द्विजः।नचाख्यानमिदंविद्यान्नैव
सस्याद्विचक्षणः।श्रुत्वात्विदमुपाख्यानंश्राव्यमन्यन्नरोचते।पुंस्कोकिलरुतंश्रुत्वारूक्षाध्वांक्षस्यवागिव।इतिहासोत्त
मादस्माज्जायन्तेकविबुद्धयः।पंचभ्यइवभूतेभ्योलोकसंविधयस्त्रयः।अस्याख्यानस्यविषयेपुराणंवर्त्ततेद्विजाः
।अंतरिक्षस्यविषयेप्रजाइवचतुर्विधाः।क्रियागुणानांसर्वेषामिदमाख्यानमाश्रयः।इंद्रियाणांसमस्तानांचि
त्राइवमनःक्रियाः।अनाश्रित्यैतदाख्यानंकथाभुविनविद्यते।आहारमनपाश्रित्यशरीरस्येवधारणं।इदंक
विवरैःसर्वैराख्यानमुपजीव्यते।उदयप्रेप्सुभिर्भृत्यैरभिजातइवेश्वरः।अस्यकाव्यस्यकवयोनसमर्थाविशेष
णे।साधोरिवगृहस्थस्यशेषास्त्रयइवाश्रमाः।धर्मेमतिर्भवतुवःसततोत्थितानांसह्येकएवपरलोकगतस्य
बंधुः।अर्थाःस्त्रियश्चनिपुणैरपिसेव्यमानानैवाप्तभावमुपयांतिनचस्थिरत्वं।द्वैपायनोष्ठपुटनिःसृतमप्रमेयं
पुण्यंपवित्रमथपापहरंशिवंच।।योभारतंसमधिगच्छतिवाच्यमानंकिंतस्यपुष्करजलैरभिषेचनेन।।यदह्ना
कुरुतेपापंब्राह्मणस्त्विन्द्रियैश्चरन्।महाभारतमाख्यायसंध्यांमुच्यतिपश्चिमां।यद्रात्रौकुरुतेपापंकर्मणा
मनसागिरा।महाभारतमाख्यायपूर्वांसंध्यांप्रमुच्यते।।योगोशतंकनकशृंगमयंददातिविप्रायवेदविदुषे

चवेदाङ्गश्रुताय।पुण्यांचभारतकथांशृणुयाच्चनित्यंतुल्यंफलंभवतिमस्यचतस्यचैव॥आख्यानंतदिदमनुत्त
मंमहार्थंविज्ञेयंमहदिदंहपर्वसंग्रहेण।श्रुत्वादौभवतिनृणांसुखावगाहंविस्तीर्णंलवणजलंयथाप्लवे
न इतिमहाभारतेआदिपर्वणिसंग्रहःसमाप्तम् सौतिरुवाच जनमेजयःपारिक्षि
तःसहभ्रातृभिःकुरुक्षेत्रेदीर्घसत्रमुपास्ते।तस्यभ्रातरस्त्रयःश्रुतसेनोउग्रसेनभीमसेनइति।तेषुतत्सत्र
मुपासीनेष्वागच्छत्सारमेयः।सजनमेजयस्यभ्रातृभिरभिहतोरोरूयमाणोमातुःसमीपमुपागच्छत्॥
तंमातारोरूयमाणमुवाच।किंरोदिषिकेनास्यभिहतइति।सएवमुक्तोमातरंप्रत्युवाच॥जनमेजयस्यभ्रा
तृभिरभिहतोस्मीति॥तंमाताप्रत्युवाच॥व्यक्तंत्वयातत्रापराद्धंयेनास्यभिहतइति॥सतांपुनरुवाच॥ना
पराध्यामिकिंचिन्नावेक्षेहवींषिनावलिहइति।तच्छ्रुत्वातस्यमातासरमापुत्रदुःखार्तातत्सत्रमुपागच्छद्यत्र
सजनमेजयःसहभ्रातृभिर्दीर्घसत्रमुपास्ते।सतयाक्रुद्धयातत्रोक्तोयंमेपुत्रोनकिंचिदपराध्यतिनावेक्षतेह
वींषिनावलेढिकिमर्थमभिहतइति।नकिंचिदुक्तवंतस्तानुवाच॥यस्मादयमभिहतोनपकारीतस्माददृ
ष्टंत्वांभयमागमिष्यतीति।जनमेजयएवमुक्तोदेवशुन्यासरमयाभृशंसंभ्रांतोविषण्णश्चासीत्।सतस्मिन्

सत्रेसमाप्तेहास्तिनपुरंप्रत्येत्यपुरोहितमनुरूपमन्विच्छमाणःपरंयत्नमकरोत्।योमेपापकृत्यांशमयेदि
ति।सकदाचिन्मृगयांगतःपारिक्षितोजनमेजयःकस्मिंश्चित्स्वविषयेआश्रममपश्यत्।तत्रकश्चिदृषिरा
सांचक्रेश्रुतश्रवानाम।तस्यतपस्यभिरतःपुत्रआस्तेसोमश्रवानाम।तस्यतंपुत्रमभिगम्यजनमेजयःपा
रिक्षितःपौरोहित्यायवव्रे।सनमस्कृत्यतमृषिमुवाच।भगवन्नयंतवपुत्रोममपुरोहितोस्त्विति।सएवमुक्तः
प्रत्युवाचजनमेजयं।भोजनमेजयपुत्रोयंममसर्प्यांजातोमहातपस्वीस्वाध्यायसंपन्नोमत्तपोवीर्यसंभृतो
मच्छुक्रंपीतवत्यास्तस्याःकुक्षौजातः।समर्थोयंभवतःसर्वाःपापकृत्याःशमयितुमंतरेणमहादेवकृ
त्यां।अस्यत्वेकमुपांशुव्रतंयदेनंकश्चिद्ब्राह्मणःकंचिदर्थमभियाचेत्तंतस्मैदद्यादयं।यद्येतदुत्सहसे
ततोनयस्वैनमिति।तेनैवमुक्तोजनमेजयस्तंप्रत्युवाच।भगवंस्तत्तथाभविष्यतीति।सतंपुरोहितमुपादा
योपावृत्तोभ्रातॄनुवाच।।मयायंवृतउपाध्यायोयदयंब्रूयात्तत्कार्यमविचारयद्भिर्भवद्भिरिति।तेनैवमुक्ता
भ्रातरस्तस्यतथाचक्रुः।सतथाभ्रातॄन्संदिश्यतक्षशिलांप्रत्यभितस्थे।तंचदेशंवशेस्थापयामास।।
एतस्मिन्नन्तरेकश्चिदृषिर्धौम्योनामापोदस्तस्यशिष्यास्त्रयोबभूवुः।उपमन्युरारुणिर्वेदश्चेति।सएकंशि

ष्यमारुणिंपांचाल्यंप्रेषयामास।गच्छकेदारखंडंवधानेति।सउपाध्यायेनसंदिष्टआरुणिःपांचाल्यस्तत्रग
त्वातत्केदारखंडंबद्धुंनाशकत।सक्लिश्यमानोनापश्यदुपायं।भवत्त्वेवंकरिष्यामीति।सतत्रसंविवेश।
केदारखंडेशयानेचतथातस्मिंस्तदुदकंतस्थौ।ततःकदाचिदुपाध्यायआपोदोधौम्यःशिष्यानपृच्छत्।
क्वआरुणिःपांचाल्योगतइति।तेतंप्रत्यूचुर्भगवंस्त्वयैवप्रेषितोगच्छकेदारखंडंवधानेति०सएवमुक्तस्ता
न्शिष्यान्प्रत्युवाच०तस्मात्तत्रसर्वेगच्छामोयत्रसगतइति।सतत्रगत्वातस्याह्वानायशब्दंचकार।भो
आरुणेपांचाल्यक्वासिवत्सैहीति।सतच्छ्रुत्वाआरुणिरुपाध्यायवाक्यंतस्मात्केदारखंडात्सहसोत्थायत
मुपाध्यायमुपतस्थे।प्रोवाचचैनमयमस्म्यत्रकेदारखंडेनिःसरमाणमुदकमवारणीयंसंरोद्धुंसंविष्टो
भगवच्छब्दंश्रुत्वैवसहसाविदार्यकेदारखंडंभवंतमुपस्थितः।तदभिवादयेभगवंतमाज्ञापयतुभवान्कम
र्थंकरवाणीति।सएवमुक्तःउपाध्यायःप्रत्युवाच।यस्माद्भवान्केदारखंडंविदार्योत्थितस्तस्मादुद्दालकएव
नाम्नाभविष्यतीत्युपाध्यायेनानुगृहीतः।यस्माच्चत्वयामद्वचनमनुष्ठितंतस्माच्छ्रेयोवाप्स्यसि।सर्वेचतेवेदाः
प्रतिभास्यंतिसर्वाणिचधर्मशास्त्राणीतिसएवमुक्तउपाध्यायेनेष्टंदेशंजगाम।अथापरःशिष्यस्तस्यैवायो

दधौम्यस्योपमन्युर्नाम तं चोपाध्यायः प्रेषयामास वत्सोपमन्यो गा रक्षस्वेति स उपाध्यायवचनादरक्षद्गाः
स चाहनि गा रक्षित्वा दिवसक्षये गुरुगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायः पीवानम
पश्यदुवाच चैनं वत्सोपमन्यो केन वृत्तिं कल्पयसि। पीवानसि दृढमिति। स उपाध्यायं प्रत्युवाच भो भैक्षेण वृ
त्तिं कल्पयामीति। तमुपाध्यायः प्रत्युवाच। ममानिवेद्य भैक्षं नोपयोक्तव्यमिति॰ स तथेत्युक्त्वा भैक्षं चरित्वो
पाध्यायाय न्यवेदयत्। स तस्मादुपाध्यायः सर्वमेव भैक्षमगृह्णात्। स तथेत्युक्तः पुनररक्षद्गाः। अहनि र
क्षित्वा निशामुखे गुरुकुलमागम्य गुरोरग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वोवा
च। वत्सोपमन्यो सर्वमशेषतस्ते भैक्षं गृह्णामि केनेदानीं वृत्तिं कल्पयसीति। स एवमुक्त उपाध्यायं प्रत्युवा
च। भगवते निवेद्य पूर्वमपरं चरामि तेन वृत्तिं कल्पयामीति॰ तमुपाध्यायः प्रत्युवाच। नैषा न्याय्या गुरुवृत्तिर
न्येषामपि भैक्षोपजीविनां वृत्त्युपरोधं करोषि इत्येवं वर्त्तमानो लुब्धोसीति॰ स तथेत्युक्त्वा गा अरक्षत्। रक्षित्वा
च पुनरुपाध्यायगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे। तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वा पु
नरुवाच। वत्सोपमन्यो अहं ते सर्वं भैक्षं गृह्णामि न चान्यच्चरसि॰ पीवानसि भृशं केन वृत्तिं कल्पयसीति। स

एवमुक्तस्तमुपाध्यायंप्रत्युवाच। भोएतासांगवांपयसावृत्तिंकल्पयामीति। तमुवाचोपाध्यायोनैतन्न्याय्यंप
यउपयोक्तुंभवतोमयाननुज्ञातमिति। सतथेतिप्रतिज्ञायगारक्षित्वापुनरुपाध्यायगृहानेत्यगुरोरग्र
तःस्थित्वानमश्चक्रे॰ तमुपाध्यायःपीवानमेवदृष्ट्वोवाच। वत्सोपमन्योभैक्ष्यंनाश्नासिनचान्यच्चरसि॰ पयो
नपिबसिपीवानसिभृशंकेनेदानींवृत्तिंकल्पयसीति। सएवमुक्तउपाध्यायंप्रत्युवाच। भोःफेनंपिबामि॰
यमिमेवत्सामातॄणांस्तनान्पिबन्तउद्गिरन्ति। ~~तदेषाममपिवत्सानां~~तमुपाध्यायःप्रत्युवाच॰ एतेत्वदनुकं
पयागुणवन्तोवत्साःप्रभूततरंफेनमुद्गिरन्ति। तदेषामपिवत्सानांवृत्त्युपरोधंकरोष्येवंवर्त्तमानःफेनम
पिभवान्नपातुमर्हतीति। सतथेतिप्रतिश्रुत्यपुनररक्षद्गाः। तथाप्रतिषिद्धोभैक्ष्यंनाश्नातिनचान्यच्चरति॰
पयोनपिबति॰ फेनंनोपभुङ्क्ते॰ सकदाचिदरण्येक्षुधार्त्तोऽर्कपत्राण्यभक्षयत्। सतैरर्कपत्रैर्भक्षितैःक्षा
रतिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धोबभूव। सोऽन्धोपिचंक्रम्यमाणःकूपेपपात। अथतस्मिन्नना
गच्छतिसूर्येचास्ताचलावलंबिनिउपाध्यायःशिष्यानवोचत्। मयोपमन्युःसर्वतःप्रतिषिद्धःसनियतंकुपि
तस्ततोनागच्छतिचिरं। ततोन्वेष्यइत्येवमुक्त्वाशिष्यैःसार्द्धमरण्यंगत्वातस्याह्वानायशब्दंचकार। भोउपमन्यो

क्वासिवत्सेहीति।सउपाध्यायवचनंश्रुत्वाप्रत्युवाचोच्चैरयमस्मिन्कूपेपतितोहमिति॰तमुपाध्यायःप्रत्यु
वाच॰कथंत्वमस्मिन्कूपेपतितइति॰सउपाध्यायंप्रत्युवाच॰अर्कपत्राणिभक्षयित्वांधीभूतोस्म्यतःकूपेप
तितइति॰तमुपाध्यायःप्रत्युवाच॰अश्विनौस्तुहि॰तौदेवभिषजौत्वांचक्षुष्मंतंकर्त्तारावितिं॰सएवमुक्तउपा
ध्यायेनोपमन्युरश्विनौस्तोतुमुपचक्रमे।देवावश्विनौवाग्भिरृग्भिः।प्रपूर्वगौपूर्वजौचित्रभानूगिरावाशंसा
मितपसाह्यनंतौ।दिव्यौसुपर्णौविरजौविमानावधिक्षियंतौभुवनानिविश्वा।हिरन्मयौशकुनीसांपरायौ
नासत्यदस्रौसुनसौवैजयंतौ।शुक्लंवयंतौतरसासुवेमावधिव्ययंतावसितंविवस्वतः।ग्रस्तांसुपर्णस्यबले
नवर्त्तिकाममुंचतामश्विनौसौभगाय।तावत्सुवृत्तावनमंतमायायोसत्तमागाअरुणाउदावहन्।षष्टिश्च
गावस्त्रिशताश्चधेनवएकंवत्संसुवतेतंदुहंति।नानागोष्ठाविहिताएकदोहनास्तावश्विनौदुहतोघर्म्ममुक्थं।
एकांनाभिंसप्तशताःअराःश्रिताःप्रधिष्वन्याविंशतिरर्पिताअराः।अनेमिचक्रंपरिवर्त्ततेजरंमायाश्विनौस
मनक्तिचर्षणी।एकंचक्रंवर्त्ततेद्वादशारंमधिषण्णाभमेकाक्षममृतस्यधाम।यस्मिन्देवाअधिविश्वेविष
क्तास्तावश्विनौमुंचतोमाविषीदतं।अश्विनाविंद्रममृतंवृत्तभूयौतिरोधत्तामश्विनौदासपत्नीः।हित्वागि

रिमश्विनौगामुदाचरंतौतत्दृष्टंकर्मप्रथितौवलस्य।युवांदिशोजनयथो।दशाग्रेसमानंमूर्द्धिरथवाविया
ति।तासांयातमृषयोनुप्रयांतिदेवामनुष्याःक्षितिमाचरंति।युवांवर्णान्विकुरुथोविश्वरूपान्येधिक्षि
यंतेभुवनानिविश्वा।तेभानवोप्यनुसृताश्चरंतिदेवामनुष्याःक्षितिमाचरंति।तौनासत्यावश्विनौवांमहे
स्रजंचयांविभृथःपुष्करस्य।तौनासत्यावमृतावृतावृतेदेवास्तत्प्रपदेनसूते।मुखेनगर्भंलभेतांयुवानौग
तासुरेतत्प्रपदेनसूते।सद्योजातोमातरमत्तिगर्भः।तावश्विनौमुंचथोजीवसेगाः।इत्येवंतेनाभिष्टुतावश्वि
नावाजग्मतुराहतुश्चैनंप्रीतौस्वएषतेपूपोशानेनमिति।सएवमुक्तःप्रत्युवाचनानृतमूचतुर्भगवंतौनत्वह
मेतमपूपमुपयोक्तुमुत्सहेगुरवेनिवेद्येति।ततस्तमश्विनावूचतुः।आवाभ्यांपुरस्ताद्भवतउपाध्यायेनैव
मेवाभिष्टुताभ्यामपूपोदत्तउपयुक्तःसतेनानिवेद्यगुरवेत्वमपितथैवकुरुष्वयथाकृतमुपाध्यायेनेति।
सएवमुक्तःप्रत्युवाचैतौ।एतत्प्रत्यनुनयेभवंतावश्विनौनोत्सहेहमनिवेद्यगुरवेऽपूपमेनमुपयोक्तुमिति।
नमश्विनावाहतुःप्रीतौस्वस्तप्स्यसीति।एवमुक्तोश्विभ्यांलब्धचक्षुरुपाध्यायसकाशमागम्याभ्यवादय
त्।आचचक्षेचसचास्यप्रीतिमानभूत्।आहचैनंयथाश्विनावाहतुस्तथात्वंश्रेयोवाप्स्यसि।सर्वेचतेवेदाः

वानयागुरुभक्त्या।उपाध्यायस्यतेकार्ष्णायसादंताभवतोपिहिरण्मयाभविष्यंतिचक्षुष्मांश्चभविष्यसीतिश्रेयश्चावा २

प्रतिमास्यंधीतिसर्व्वाणिचधर्मशास्त्राणीति।एषातस्यापिपरीक्षोपमन्योः।अथापरःशिष्यस्तस्यैवायोद
स्यधौम्यस्यवेदोनाम॰तमुपाध्यायःसमादिदेश॰वत्सवेदइहास्यतांतावन्मगृहेकंचित्कालंशुश्रूषणाच
भवितव्यंश्रेयस्तेभविष्यतीति।सतथेत्युक्त्वागुरुकुलेदीर्घकालंगुरुशुश्रूषापरोवसत।गौरिवनित्यंगुरू
णांधूर्षुनियोज्यमानःशीतोष्णक्षुत्तृष्णादुःखसहःसर्वत्राप्रतिकूलस्तस्यमहताकालेनगुरुःपरितोषंज
गाम।तत्परितोषाच्चश्रेयःसर्वज्ञतांचावाप।एषातस्यापिपरीक्षावेदस्य।सउपाध्यायेनानुज्ञातस्समावृ
त्तस्तस्माद्गुरुकुलवासाद्गृहाश्रमंप्रत्यपद्यत।तस्यापिवसतःस्वगृहेत्रयःशिष्याबभूवुः।सशिष्यान्नकिं
चिदुवाचकर्मवाक्रियतांगुरुशुश्रूषावेति।दुःखाभिज्ञोहिगुरुकुलवासस्यशिष्यान्परिक्लेशेनयोजयि
तुंनेयेष।अथकस्मिंश्चित्कालेवेदंब्राह्मणंजनमेजयःपौष्यश्चक्षत्रियावुपेत्यवरयित्वोपाध्यायंचक्रतुः।
सकदाचिद्याज्यकार्येणाभिप्रस्थितउत्तंकनामानंशिष्यंनियोजयामास।भोउत्तंकयत्किंचिदस्मद्गृहेप
रिहीयतेतदिच्छाम्यहमपरिहीयमाणंभवताक्रियमाणमिति।सएवंप्रतिसंदिश्योत्तंकंवेदःप्रवासंज
गाम।अथोत्तंकःशुश्रूषुर्गुरुनियोगमनुतिष्ठमानोगुरुकुलेवसतिस्म।सतत्रवसमानउपाध्यायस्त्रीभिः

सहिताभिराहूयोक्त उपाध्यायिनी तेऽनुमती उपाध्यायश्च प्रोषितोऽस्या यथायमृतुर्वंध्यो न भवति त
थाक्रियतामेतद्धि विषीदतीति। स एवमुक्तस्ताः स्त्रियः प्रत्युवाच। न मया स्त्रीणां वचनादिदमकार्यं करणीयं।
न ह्यहमुपाध्यायेन संदिष्टोऽकार्यमपि त्वया कार्यमिति। तस्य पुनरुपाध्यायः कालांतरेण गृहमाजगाम त
स्मात्प्रवासात्। स तु तद्वृत्तांतमस्याशेषमुपलभ्य प्रीतिमानभूत्। उवाच चैनं वत्सोत्तंक किं ते प्रियं कर
वाणीति। धर्मतो हि शुश्रूषितोऽस्मि भवता तेन प्रीतिः परस्परेण नौ संवृद्धा तदनुजाने भवंतं सर्वानेव का
मानवाप्स्यसि गम्यतामिति। स एवमुक्तः प्रत्युवाच किं ते प्रियं करवाणीति। एवं चाहुः यश्चाधर्मेण वै ब्रूयाद्य
श्चाधर्मेण पृच्छति। तयोरन्यतरः प्रैति विद्वेषं चाधिगच्छति। सोहमनुज्ञातो भवता इच्छामीष्टं गुर्वर्थमुपहर्तुमि
ति। तेनैवमुक्त उपाध्यायः प्रत्युवाच। वत्सोत्तंक उष्यतां तावदिति। स कदाचिदुपाध्यायमाहोत्तंकः आज्ञापय
तु भवान् किं ते प्रियमुपहरामि गुर्वर्थमिति· तमुपाध्यायः प्रत्युवाच· वत्सोत्तंक बहुशो मां चोदयसि गुर्वर्थ
मुपहरामीति तद्गच्छैनां प्रविश्योपाध्यायिनीं पृच्छ किमुपहरामीति। एषा यद्ब्रवीति तदुपाहरस्वेति। स एवमुक्त
उपाध्यायेनोपाध्यायिनीमपृच्छत्। भगवत्युपाध्यायेनास्म्यनुज्ञातो गृहं गंतुमिच्छामीष्टं ते गुर्वर्थमुपहृत्य सा

नृणो गंतुमिति। तदाज्ञापयितु भवती किमुपहरामि गुर्वर्थमिति। सैवमुक्तोपाध्यायिनी तमुत्तंकं प्रत्युवा
च। गच्छ पौष्यं प्रति राजानं कुंडले भिक्षितुं तस्य क्षत्रियया पिनद्धे। आनयस्व चतुर्थेहनि पुण्यकं भविता ता
भ्यां माबद्धाभ्यां शोभमाना ब्राह्मणान्परिवेष्टुमिच्छामि। तत्संपादयस्व। एवं हि कुर्वतः श्रेयो भविताऽन्य
था कुतः श्रेय इति। स एवमुक्तस्तया प्रातिष्ठितोत्तंकः स पथि गच्छन्नपश्यदृषभमतिप्रमाणं तमधिरूढं च
पुरुषमतिप्रमाणमेव। स पुरुष उत्तंकमभ्यभाषत। भो उत्तंकैतत्पुरीषमस्य ऋषभस्य भक्षयस्वेति। स
एवमुक्तो नैच्छत्। तमाह स पुरुषो भूयो भक्षयस्वोत्तंक मा विचारयोपाध्यायेनापि ते भक्षितं पूर्वमिति। स
एवमुक्तो बाढमित्युक्त्वा तदा तदृषभस्य मूत्रं पुरीषं च भक्षयित्वोत्तंकः संभ्रांतः स्थित एवोपस्पृश्य प्रतस्थे।
यत्र स क्षत्रियः पौष्यस्तमुपेत्यासीनमपश्यदुत्तंकः। स उत्तंकस्तमुपेत्याशीर्भिरभिनंद्योवाच। अर्थी भवंत
मुपागतोस्मीति। स एनमभिवाद्योवाच। भगवन्पौष्यः खल्वहं किं करवाणीति। स तमुवाच गुर्वर्थं कुंडलयो
रर्थेनाभ्यागतोस्मीति। स एनमभिवाद्योवाच ये वै ते क्षत्रियया पिनद्धे कुंडले ते भवान्दातुमर्हतीति। तं प्रत्युवा
च पौष्यः प्रविश्यांतःपुरं क्षत्रिया याच्यतामिति। स तेनैवमुक्तः प्रविश्यांतःपुरं क्षत्रियां नापश्यत्। स पौष्यं पुन

आ० प०
३०

रुवाच। नयुक्तंभवताहमनृतेनोपचरितुं। नहितेंतःपुरे क्षत्रियासन्निहितानैनांपश्यामि। सएवमुक्तः पौष्यः
क्षणमात्रंविमृश्योत्तंकं प्रत्युवाच। नियतंभवानुच्छिष्टः स्मरतावन्नहि साक्षत्रियाउच्छिष्टेनाशुचिनाशक्याद्रष्टुं
पतिव्रतात्वात्सैषानाशुचेर्दर्शनमुपैतीति। अथैवमुक्तउत्तंकः स्मृत्वोवाचास्तिखलुमयोत्थितेनोपस्पृष्टंग
च्छताचेति। तंपौष्यः प्रत्युवाच। एषतेव्यतिक्रमोनोपस्पृष्टंभवति· नगच्छताचेति· अथोत्तंकस्तंतथेत्युक्त्वाप्रा
ङ्मुखउपविश्यसुप्रक्षालितपाणिपादवदनोनिःशब्दाभिरफेनाभिरनुष्णाभिर्हृद्गताभिरद्भिस्त्रिरुपस्पृ
श्यद्विःपरिमृज्यखान्यद्भिरुपस्पृश्यचांतःपुरंप्रविवेश। ततःस्तांक्षत्रियामपश्यत्। साचदृष्ट्वैवोत्तंकंप्रत्यु
त्थायाभिवाद्योवाच· स्वागतंभगवन्नाज्ञापयकिंकरवाणीति। सतामुवाचैतेकुंडलेगुर्वर्थंमेभिक्षिते
दातुमर्हसीतिः साप्रीतातेनतस्यसद्भावेनपात्रोयमनतिक्रमणीयश्चेतिमत्वातेकुंडलेअवमुच्यास्मैप्राय
च्छत्। आहचैनमेतेकुंडलेतक्षकोनागराजःसुभृशंप्रार्थयत्यप्रमत्तोनेतुमर्हसीति। सएवमुक्तस्तांक्षत्रियां
प्रत्युवाच· भवतिसुनिर्वृताभव· नमांशक्तस्तक्षकोनागराजोधर्षयितुमिति। सएवमुक्त्वातांक्षत्रियामा
मंत्र्यपौष्यसकाशमागच्छत्। आहचैनंभोः पौष्यप्रीतोस्मीति। तमुत्तंकंपौष्यः प्रत्युवाच। भगवंश्चिरेण

३०

पात्रमासाद्यते भवांश्च गुणवानतिथिस्तदिछेश्राद्धंकर्तुंक्रियतांक्षणइति।तमुत्तंकःप्रत्युवाच·कृतक्षणए
वास्मिशीघ्रमिछामियथोपपन्नमन्नमुपाहृतंभवतेति।सतथेत्युक्त्वायथोपपन्नेनान्नेनैनंभोजयामास·
अथोत्तंकःसकेशंशीतमन्नंदृष्ट्वाअशुच्येतदितिमत्वातंपौष्यमुवाच।यस्मान्मेअशुच्यन्नंददासितस्माद
धोभविष्यसीति·तंपौष्यःप्रत्युवाच·यस्मात्त्वमप्यऽदुष्टमन्नंदूषयसितस्मात्त्वमनपत्योभविष्यसीति।त
मुत्तंकःप्रत्युवाच·नयुक्तंभवतान्नमशुचिदत्वाप्रतिशापंदातुंतस्मादन्नमेवप्रत्यक्षीकुरु·ततःपौष्यस्त
दन्नमशुचिदृष्ट्वातस्याशुचिभावमपरोक्षयामास।अथतदन्नंमुक्तकेश्यास्त्रियोपहृतमनुष्णंसकेशंचा
शुच्येतदितिमत्वातमृषिमुत्तंकंप्रसादयामास।भगवन्नेतदज्ञानादन्नंसकेशमुपाहृतंशीतंतत्क्षामयेभ
वंतंनभवेयमंधइति·तमुत्तंकःप्रत्युवाच·नमृषाब्रवीमिभूत्वात्वमंधोनचिरादनंधोभविष्यसीति।ममापि
तुशापोभवतादत्तोनभवेदिति·तंपौष्यःप्रत्युवाच·नचाहंशक्तःशापंप्रत्यादातुंनहिमेमन्युरद्याप्युपशमं
गछति·किंचैतद्भवतानज्ञायतेयथा·नवनीतंहृदयंब्राह्मणस्यवाचिक्षुरोनिशितस्तीक्ष्णधारः।तदुभय
मेतद्विपरीतंक्षत्रियस्यवाङ्नवनीतंहृदयंतीक्ष्णधारमिति।तदेवंगतेनशक्तोहंतीक्ष्णहृदयत्वात्तंशापम

न्यथाकर्तुंगम्यतामिति॰ तमुत्तंकःप्रत्युवाच।भवताहमन्नस्याशुचिभावमालक्ष्यप्रत्यनुनीतःप्राक्तेऽभि
हितंयस्माददुष्टमन्नंदूषयसितस्मादनपत्योभविष्यसीति।दुष्टेचान्नेनैषममशापोभविष्यतीति।साधया
मस्तावदित्युक्त्वाप्रातिष्ठतोत्तंकः।तेकुंडलेगृहीत्वासोपश्यदथपथिनग्नंक्षपणकमागच्छंतंमुहुर्दृश्यमानम
दृश्यमानंच॰ अथोत्तंकस्तेकुंडलेसन्न्यस्यभूमावुदकार्थंप्रचक्रमे।एतस्मिन्नंतरेसक्षपणकस्त्वरमाणउ
पसृत्यतेकुंडलेगृहीत्वाप्राद्रवत्।तमुत्तंकोभिसृत्यकृतोदककार्यःशुचिःप्रयतोनमोदेवेभ्योगुरुभ्यश्चकृ
त्वामहताजवेनतमन्वयात्।तस्यतक्षकोदृढमासन्नः।सतंजग्राहगृहीतमात्रःसतद्रूपंविहायतक्षकस्व
रूपंकृत्वासहसाधरण्यांविवृतंमहाविलंप्रविवेश।प्रविश्यचनागलोकंस्वभवनमगच्छत्।अथोत्तंकस्त
स्याःक्षत्रियायावचःस्मृत्वातंतक्षकमवगच्छत्।सद्विलंदंडकाष्ठेनचखाननचाशकत्।तंक्लिश्यमान
मिंद्रोपश्यत्सवज्रंप्रेषयामास।गच्छास्यब्राह्मणस्यसाहाय्यंकुरुष्वेति।अथवज्रंदंडकाष्ठमनुप्रविश्यत
द्विलमदारयत्।तमुत्तंकोनुविवेश।तेनैवविलेनप्रविश्यतंनागलोकमपर्यंतमनेकविधप्रासादहर्म्य
वलभीनिर्यूहशतसंकुलमुच्चावचक्रीडाश्चर्यस्थानावकीर्णमपश्यत्।सतत्रनागांस्तानस्तुवदेभिःश्लो

केः॥ यऐरावतराजानःसर्प्पाःसमितिशोभनाः।क्षरंतइवजीमूताःसविद्युत्पनेरिताः।सुरूपावहुरूपाश्च
तथाकल्माषकुंडलाः।आदित्यवन्नाकपृष्ठेरेजुरैरावतोद्भवाः।बहूनिनागवेश्मानिगंगायास्तीरउत्तरे।त
त्रस्थानपिसंस्तौमिमहतःपन्नगानहं।इच्छेत्कोर्कांशुसेनायांचर्तुमैरावतंविना।शतान्यशीतिरष्टौचसह
स्राणिचविंशतिः।सर्पाणांप्रग्रहायांतिधृतराष्ट्रोयदेजति।येचैनमुपसर्पंतियेचदूरंपथंगताः।अह
मैरावतज्येष्ठभ्रातृभ्योऽकरवंनमः।यस्यवासःकुरुक्षेत्रेखांडवेचाभवत्पुरा।तंनागराजमस्तोषंकुंडला
र्थायतक्षकं।तक्षकश्चाश्वसेनश्चनित्यंसहचरावुभौ।कुरुक्षेत्रेचावसतांनदीमिक्षुमतीमनु।जघन्यजस्त
क्षकस्यश्रुतसेतियःश्रुतः।अवसद्योमहद्युम्निप्रार्थयन्नागमुख्यतां।करवाणिसदाचाहंनमस्तस्मैम
हात्मने।एवंस्तुत्वासविप्रर्षिरुत्तंकोभुजगोत्तमान्।नैवतेकुंडलेलेभेततश्चिंतामुपागमत्।एवंस्तुवन्नपिना
गान्यदातेकुंडलेनालभत्तदापश्यत्स्त्रियौतंत्रेअधिरोप्यसुवेमेपटंवपंत्यौतस्मिंस्तंत्रेकृष्णाःसिताश्चतं
तवश्चक्रंचापश्यत्षड्भिःकुमारैःपरिवर्त्यमानं।पुरुषंचापश्यदश्वंचदर्शनीयं।सतान्सर्वांस्तुष्टावएभिर्मं
त्रवादश्लोकैः॥त्रीण्यर्पितान्यत्रशतानिमध्येषष्टिश्चनित्यंचरतिध्रुवेस्मिन्।चक्रेचतुर्विंशतिपर्वयोगेष

डुकुमाराःपरिवर्त्तयंति।तंत्रंचेदंविश्वरूपेविचित्रौयुवत्यौवयतस्तंतुंसततंवर्त्तयंत्यौ।कृष्णान्सितांश्चैव
विवर्त्तयंतौभूतान्यजस्रंभुवनानिचैव।वज्रस्यभर्त्ताभुवनस्यगोप्तावृत्रस्यहंतानमुचेर्निहंता।कृष्णेवसा
नोवसनेमहात्मासत्यानृतेयोविविनक्तिलोके।योवाजिनंगर्भमपांपुराणंवैश्वानरंवाहनमभ्युपेत्य।नमो
स्तुतस्मैजगदीश्वरायलोकत्रयेशायपुरंदराय।ततःसएनंपुरुषःप्राहप्रीतोस्मितेहमनेनस्तोत्रेण।किं
तेप्रियंकरवाणीति।सतमुवाच॰नागामेवशमीयुरिति॰सचैनंपुरुषःपुनरुवाच॰एतमश्वमपानेध
मस्वेति।ततोश्वस्यापानमधमत्ततोश्वाद्धम्यमानात्सर्वस्रोतोभ्यःपावकार्चिषःसधूमानिःपेतुस्ताभि
र्नागलोकउपधूपितेथसंभ्रांतस्तक्षकोग्नेस्तेजोभयाद्विषण्णःकुंडलेगृहीत्वासहसाभवनान्निष्क्र
म्योत्तंकमुवाच॰इमेकुंडलेगृह्णातुभवानिति॰सतेप्रतिजग्राहोत्तंकःप्रतिगृह्यचकुंडलेचिंतयत।
अद्यतत्पुण्यकमुपाध्यायिन्यादूरंचाहमभ्यागतःसकथंसंभावयेयमिति।ततएनंचिंतयानमेव
सपुरुषउवाच॰उत्तंकएनमेवाश्वमधिरोह।त्वांक्षणेनैवोपाध्यायकुलंप्रापयिष्यतीति।सतथेत्यु
क्त्वातमश्वमधिरुह्यप्रत्याजगामोपाध्यायकुलं॰उपाध्यायिनीचस्नाताकेशानावापयंत्युपविष्टा

त्तंको नागछतीति शापायास्य मनो दधे। अथैतस्मिन्नंतरे स उत्तंकः प्रविश्योपाध्यायिनीमभ्यवादय
त्। ते चास्मै कुंडले प्रायछत्सा चैनं प्रत्युवाच। उत्तंक देशकालेभ्यागतः स्वागतं ते वत्स मनागसि मया न शप्तः
श्रेयस्तवोपस्थितं सिद्धिमाप्नुहीति। अथोत्तंक उपाध्यायमभ्यवादयत्। तमुपाध्यायः प्रत्युवाच॰ वत्सोत्तं
क स्वागतं ते किं चिरं कृतमिति। तमुत्तंक उपाध्यायं प्रत्युवाच। भोस्तक्षकेन मे नागराजेन विघ्नः कृतोस्मिन्
कर्म्मणि तेनास्मि नागलोकं गतस्तत्र च मया दृष्टे स्त्रियौ तंत्रेऽधिरोप्य पटं वयंत्यौ तस्मिंश्च कृष्णाः सिताश्च
तंतवः किं तत्। तत्र च मया चक्रं दृष्टं द्वादशारं षड्चैनं कुमाराः परिवर्त्तयंति। तदपि किं। पुरुषश्चापि मया
दृष्टः स चापि कः। अश्वश्चातिप्रमाणो दृष्टः स चापि कः। पथि गछता च मया ऋषभो दृष्टस्तं च पुरुषोधि
रूढस्तेनास्मि सोपचारमुक्तः उत्तंकास्य ऋषभस्य पुरीषं भक्षयेति उपाध्यायेनापि ते भक्षितमिति॰ तत
स्तस्य वचनान्मया तदृषभस्य पुरीषमुपयुक्तं। स चापि कः। तदेतद्भवतोपदिष्टमिछेयं श्रोतुं किं तदिति।
स तेनैवमुक्त उपाध्यायः प्रत्युवाच॰ ये ते स्त्रियौ धाता विधाता च॰ ये च ते कृष्णाः सितास्तंतवस्ते रात्र्यहनी॰
यदपि तच्चक्रं द्वादशारं षड्कुमाराः परिवर्त्तयंति। तेपि षड्ऋतवः संवत्सरश्चक्रं। यः पुरुषः स पर्जन्यः यो

उ१

श्वःसोग्निः।यश्चऋषभस्त्वयापथिगच्छतादृष्टःसऐरावतोनागराट्।यश्चैनमधिरूढःपुरुषःसचेंद्रः।यदपिते
भक्षितंतस्यऋषभस्यपुरीषंतदमृतंतेनखल्वसितस्मिन्नागभवनेनव्यापन्नस्त्वं।सहिभगवानिंद्रोममस
खात्वदनुक्रोशादिममनुग्रहंकृतवान्।तस्मात्कुंडलेगृहीत्वापुनरागतोसि।तत्सौम्यगम्यतामनुजानेभवंतं
श्रेयोवाप्स्यसीति।सउपाध्यायेनानुज्ञातोभगवानुत्तंकःक्रुद्धस्तक्षकंप्रतिचिकीर्षमाणोहास्तिनपुरंप्रत
स्थे।सहास्तिनपुरंप्राप्यनचिराद्विप्रसत्तमः।समागच्छतराजानमुत्तंकोजनमेजयं।पुरातक्षशिलातस्तंनिवृत्तं
मपराजितं।सम्यग्विजयिनंदृष्ट्वासमंतान्मंत्रिभिर्वृतं।तस्मैजयाशिषःपूर्वंयथान्यायंप्रयुज्यसः।उवाचैवंवचः
कालेशब्दसंपन्नयागिरा। उत्तंकउवाच अन्यस्मिन्करणीयेतुकार्येपार्थिवसत्तम।बाल्यादिवान्यदे
वत्वंकुरुषेनृपसत्तम॥ सौतिरुवाच एवमुक्तस्तुविप्रेणसराजाजनमेजयः।अर्चयित्वायथान्यायं
प्रत्युवाचद्विजोत्तमं।आसांप्रजानांपरिपालनेनस्वंक्षत्रधर्मंपरिपालयामि।प्रब्रूहिमेकिंकरणीयमद्ययेना
सिकार्येणसमागतस्त्वं॥ सौतिरुवाच सएवमुक्तस्तुनृपोत्तमेनद्विजोत्तमःपुण्यकृतांवरिष्ठः।उवा
चराजानमदीनसत्वंस्वमेवकार्यंनृपतेकुरुष्व उत्तंकउवाच तक्षकेणमहीद्रेंद्रयेनतेहिंसितःपि

नात्तस्मैप्रतिकुरुष्वत्वंपन्नगायदुरात्मने।कार्यकालंहिमन्येहंविधिदृष्टस्यकर्मणः।तद्गच्छापचितिंराजन्
पितुस्तस्यमहात्मनः।तेनह्यनपराधीसदष्टोदुष्टांतरात्मना।पंचत्वमगमद्राजावज्राहतइवद्रुमः।बलदर्पस
मुत्सिक्तस्तक्षकःपन्नगाधमः।अकार्यंकृतवान्पापोयोदशयत्पितरंतव।राजर्षिवंशगोप्तारममरप्रतिमंनृप
यियासुंकश्यपंचैवन्यवर्तयतपापकृत्।होतुमर्हसितंपापंज्वलितेहव्यवाहने।सर्पसत्रेमहाराजत्वरितंतद्वि
धीयतां।एवंपितुश्चापचितिंकृतवांस्त्वंभविष्यसि।ममप्रियंचसुमहत्कृतंराजन्भविष्यति।कर्मणःपृथिवी
पालममयेनदुरात्मना।विघ्नःकृतोमहाराजगुर्वर्थंचरतोनघ॥ सौतिरुवाच ॥एतच्छ्रुत्वातुनृपतिस्त
क्षकायचुकोपह।उत्तंकवाक्यहविषादीप्तोग्निर्हविषायथा।अपृच्छत्सतदाराजामंत्रिणस्तान्सुदुःखितः।उ
त्तंकस्यैवसान्निध्येपितुःस्वर्गगतिंप्रति।तदैवहिसराजेंद्रोदुःखशोकाप्लुतोभवत्।यदैववृत्तंपितरमुत्तंका
दश्रुणोत्तदा इत्यादिपर्वणिपौष्याख्यानंसमाप्तम् सौतिरुवाच लोमहर्षणपुत्रउग्र
श्रवाःसौतिःपौराणिकोनैमिषारण्येशौनकस्यकुलपतेर्द्वादशवार्षिकेसत्रेऋषीनभ्यागतानुपतस्थे।पौराणि
कःपुराणेकृतश्रमःसकृतांजलिस्तानुवाच।किंभवंतःश्रोतुमिच्छंतिकिमहंब्रुवाणीति तमृषयऊचुः

परमंलोमहर्षणेप्रसामस्त्वंनःप्रतिवक्ष्यसिवचः शुश्रूषतांकथायोगं।तत्रभगवान्कुलपतिस्तुशौनको
ग्निशरणमध्यास्ते।योसौदिव्याःकथावेददेवतासुरसंश्रिताः।मनुष्योरगगंधर्वकथावेदचसर्वशः।सचा
प्यस्मिन्मखेसौतेविद्वान्कुलपतिर्द्विजः।दक्षोधृतव्रतोधीमान्छास्त्रेचारण्यकेगुरुः।सत्यवादीशमपरस्तप
स्वीनियतव्रतः।सर्वेषामेवनोमान्यःसतावत्प्रतिपाल्यतां।तस्मिन्नध्यासतिगुरावासनंपरमार्चितं।ततोवक्ष्य
सियत्वंसप्रक्ष्यतिद्विजसत्तमः सौतिरु एवमस्तुगुरौतस्मिन्नुपविष्टेमहात्मनि।तेनपृष्टःकथाः
पुण्यावक्ष्यामिविविधाश्रयाः।सोथविप्रर्षभःसर्वंकृत्वाकार्यंयथाविधि।देवान्वाग्भिःपितॄनद्भिस्तर्पयित्वा
जगामह।यत्रब्रह्मर्षयःसिद्धाःसुखासीनाधृतव्रताः।यज्ञायतनमाश्रित्यसूतपुत्रपुरःसराः।ऋत्विक्ष्वथस
दस्येषुसवैगृहपतिस्तदा॥उपविष्टेषूपविष्टःशौनकोथाब्रवीदिदं इतिमहाभारतेआदिपर्वणिकथा
प्रवेशोनामाध्यायः शौनकउवाच पुराणमखिलंतातपितातेधीतवान्पुरा।कच्चित्त्वमपितत्स
र्वमधीषेलोमहर्षणे।पुराणेहिकथादिव्याआदिवंशाश्चधीमतां।कथ्यंतेयेपुरास्माभिःश्रुतपूर्वाःपितुस्त
व।तत्रवंशमहंपूर्वंश्रोतुमिच्छामिभार्गवं।कथयस्वकथामेतांकल्याःस्मश्रवणेतव सौतिरुवाच

यदधीतंपुरासम्यक्द्विजश्रेष्ठैर्महात्मभिः।वैशंपायनविप्राग्र्यैस्तैश्चापिकथितंयथा।यदधीतंचपित्रामेस
म्यक्चैवततोमया।तत्तावच्छृणुयोदेवैःसेन्द्रैःसर्षिमरुद्गणैः।पूजितःप्रवरोवंशोभार्गवोभृगुनंदन।इमंवंशम
हंपूर्वंभार्गवंतेमहामुने।निगदामियथायुक्तंपुराणाश्रयसंयुतं।भृगुर्महर्षिर्भगवान्ब्रह्मणावैस्वयंभुवा।व
रुणस्यक्रतौजातःपावकादितिनःश्रुतं।भृगोःसुदयितःपुत्रश्च्यवनोनामभार्गवः।च्यवनस्यचदायादःप्रमतिर्ना
मधार्मिकः।प्रमतेरप्यभूत्पुत्रोघृताच्यांरुरुरित्युत।रुरोरपिसुतोजज्ञेशुनकोवेदपारगः।प्रमद्वरायांधर्मात्मा
नवपूर्वपितामहात्।तपस्वीचयशस्वीचश्रुतवान्ब्रह्मवित्तमः।धार्मिकःसत्यवादीचनियतोनियताशनः॥

शौनकउवाच सूतपुत्रयथातस्यभार्गवस्यमहात्मनः।च्यवनत्वंपरिख्यातंतन्ममाचक्ष्वपृच्छतः ॥

सौतिरु भृगोःसुदयिताभार्यापुलोमेत्यभिविश्रुता।तस्यांसमभवद्गर्भोभृगुवीर्यसमुद्भवः।तस्मिन्गर्भे
थसंभूतेपुलोमायांभृगूद्वह।समयेसमशीलिन्यांधर्मपत्न्यांयशस्विनः।अभिषेकायनिष्क्रांतेभृगोधर्मभृतां
वरे।आश्रमंतस्यरक्षोथपुलोमाभ्याजगामह।तंप्रविश्याश्रमंदृष्ट्वाभृगोर्भार्यामनिंदितां।हृच्छयेनसमाविष्टो
विचेताःसमपद्यत।अभ्यागतंतुतद्रक्षःपुलोमाचारुदर्शना।न्यमंत्रयतवन्येनफलमूलादिनातदा।तांतुरक्षस्त

दारक्षस्तन्तं हृच्छयेनाभिपीडितं। दृष्ट्वा हृष्टमभूद्राजन्जिहीर्षुस्तामनिंदितां॥ जातमित्यब्रवीत्कार्यं जिहीर्षुर्मुदितः शुभां। सा हि पूर्वं वृता तेन पुलोम्ना तु शुचिस्मिता॥ तां तु प्रादात्पिता पश्चाद्भृगवे शास्त्रवत्तदा। तस्य तत्किल्बिषं नित्यं हृदि वर्त्तति भार्गव॥ इदमंतरमित्येवं हर्त्तुं चक्रे मनस्तदा। अथाग्निशरणे ऽपश्यज्ज्वलंतं जातवेदसं॥ तमपृच्छत्ततो रक्षः पावकं ज्वलितं तदा। शंस मे कस्य भार्येयमग्ने पृष्टे ऋतेन वै॥ मुखं त्वमसि देवानां वद पावक पृच्छते। मया हीयं वृता पूर्वं भार्यार्थे वरवर्णिनी॥ पश्चादिमां पिता प्रादाद्भृगवे ऽनृतकारिणे। सेयं यदि वरारोहा भृगोर्भार्या रहोगता॥ तथा सत्यं समाख्याहि जिहीर्षाम्याश्रमादिमां॥ स मन्युस्तत्र हृदयं प्रदहन्निव तिष्ठति। मत्पूर्वभार्यां यदिमां भृगुराप सुमध्यमां॥ सौतिरुवाच॥ एवं रक्षस्तमामंत्र्य ज्वलितं जातवेदसं। शंकमानं भृगोर्भार्यां पुनः पुनरपृच्छत॥ त्वमग्ने सर्वभूतानामंतश्चरसि नित्यदा। साक्षिवत्पुण्यपापेषु सत्यं ब्रूहि कवे वचः॥ मत्पूर्वापहृता भार्या भृगुणानृतकारिणा। सेयं यदि तथा मे त्वं सत्यमाख्यातुमर्हसि॥ श्रुत्वा त्वत्तो भृगोर्भार्यां हरिष्याम्याश्रमादिमां। जातवेदः पश्यतस्ते वद सत्यां गिरं मम॥ सूत उवाच॥ तस्यैतद्वचनं श्रुत्वा सप्तार्चिर्दुःखितो ऽभवत्। भीतो ऽनृताच्च शापाच्च भृगोरित्यब्रवीच्छनैः॥ अग्निरुवाच॥

त्वयाहृतापुलोमेयंपूर्वंदानवनंदन।किंत्वियंविधिनापूर्वंमंत्रवन्नहृतात्वया।पित्रातुभृगवेदत्तापुलोमेयं
यशस्विनी।प्रदत्तानतुवैतुभ्यंवरलोभान्महायशाः।अथेमांवेददृष्टेनकर्मणाविधिपूर्वकं।भार्यामृषिर्भृ
गुःप्रापमांपुरस्कृत्यदानव।सेयमित्यवगच्छामिनानृतंवक्तुमुत्सहे।नानृतंहिसदालोकेपूज्यतेदानवो
त्तम इत्यादिपर्वणिपौलोमे सौतिरुवाच अग्नेरथवचःश्रुत्वातद्रक्षःप्रजहारतां।ब्र
ह्मन्वराहरूपेणमनोमारुतरंहसा।ततःसगर्भोनिवसन्कुक्षौभृगुकुलोद्वह।रोषान्मातुश्च्युतःकुक्षेश्च्य
वनस्तेनसोभवत्॥तंदृष्ट्वामातुरुदराच्च्युतमादित्यवर्चसं।तद्रक्षोभस्मसाद्भूतंपपातपरिमुच्यतां।सातमा
दायसुश्रोणीससारभृगुनंदन।च्यवनंभार्गवंपुत्रंपुलोमादुःखमूर्छिताः।तांददर्शस्वयंब्रह्मासर्वलोकपि
तामहः।रुदतींबाष्पपूर्णाक्षींभृगोर्भार्यामनिंदितां।सांत्वयामासभगवान्वधूंब्रह्मापितामहः।अश्रुबिंदू
द्भवातस्याःप्रावर्ततमहानदी।आनुवर्त्मीश्रितातस्याभृगोःपत्न्यास्तपस्विनः।तस्यामार्गंसृतवतींदृष्ट्वातुसरि
त्तंनदीं।नामतस्यास्तदानद्याश्चक्रेलोकपितामहः।वधूसरेतिभगवांश्च्यवनस्याश्रमंप्रति।सएवंच्यवनोजज्ञेभृ
गोःपुत्रःप्रतापवान्।तंददर्शपितातत्रच्यवनंतांचभाविनीं।सपुलोमांततोभार्यांपप्रच्छकुपितोभृगुः॥ ॥

भृगुरुवाच केनासिरक्षसेतस्मैकथितात्वंजिहीर्षते।नहित्वांवेदतद्रक्षोमद्भार्यांचारुहासिनीं।तत्वमा
ख्याहितंह्यद्यशप्तुमिछाम्यहंरुषा॥बिभेतिकोनशापान्मेकस्यचायंव्यतिक्रमः॥ पुलोमोवाच अग्नि
नाभगवंस्तस्मैरक्षसेहंनिवेदिता॥ततोमामनयद्रक्षः क्रोशंतीकुररीमिव।साहंतवसुतस्यास्यतेजसापरिमो
क्षिता।भस्मीभूतंचतद्रक्षोमामुत्सृज्यपपातवै सूतउवाच इतिश्रुत्वापुलोमायाभृगुःपरमम
न्युमान्।शशापाग्निमतिक्रुद्धःसर्वभक्षोभविष्यसि इत्यादिपर्वणिपौलोमेऽग्निशापः सौति
रुवाच शप्तस्तुभृगुणावह्निःक्रुद्धोवाक्यमथाब्रवीत्।किमिदंसाहसंब्रह्मन्कृतवानसिमांप्रति।ध
र्मेप्रयतमानस्यसत्यंचवदतोमम।पृष्टोयदब्रुवंसत्यंव्यभिचारोत्रकोमम।पृष्टोहिसाक्षीयःसाक्ष्यंजानानो
प्यन्यथावदेत्।सपूर्वानात्मनःसप्तकुलेहन्यात्तथापरान्।यश्चकार्यार्थतत्वज्ञोजानानोपिनभाषते।सोपिते
नैवपापेनलिप्यतेनात्रसंशयः।शक्तोहमपिशप्तुंत्वांमान्यास्तुब्राह्मणामम।जानतोपिचतेब्रह्मकथयिष्येनि
बोधतत्।योगेनबहुधात्मानंकृत्वातिष्ठामिमूर्त्तिषु।अग्निहोत्रेषुसत्रेषुक्रियासुचमखेषुच।वेदोक्तेनविधा
नेनमयियद्धूयतेहविः।देवताःपितरश्चैवतेनतृप्ताभवन्तिवै।आपोदेवगणाःसर्वेआपःपितृगणास्तथा॥

दर्शश्चपौर्णमासश्चदेवानांपितृभिःसहादेवताःपितरस्तस्मात्पितरश्चापिदेवताः।एकीभूताश्चपूज्यंतेपृथ
क्त्वेनचपर्वसु।देवताःपितरश्चैवभुंजतेमथियत्कृतं।देवतानांपितृणांचमुखमेतदहंस्मृतं।अमावस्यांहिपि
तरःपौर्णमास्यांहिदेवताः।मन्मुखेनैवहूयंतेभुंजतेचकृतंहविः।सर्वभक्षःकथंतेषांभविष्याम्यिमुखंत्वहं
॥ सौतिरुवाच ॥चिंतयित्वाततोवह्निश्चक्रेसंहारमात्मनः।द्विजानामग्निहोत्रेषुयज्ञसत्रक्रियासुच॥
निरोंकारवषट्काराःस्वधास्वाहाविवर्जिताः।विनाग्निनाप्रजाःसर्वास्ततआसन्सुदुःखिताः।अथर्षयःसमुद्वि
ग्नादेवान्गत्वाब्रुवन्वचः।अग्निनाशात्क्रियाभ्रंशाद्भ्रांतालोकास्त्रयोनघाः।विदध्वमत्रयत्कार्यंनस्यात्कालात्ययो

५२

यथा।अथर्षयश्चदेवाश्चब्रह्माणमुपगम्यतु।अग्नेरावेदयन्शापंक्रियासंहारमेवच।भृगुणावैमहाभागशप्तो
ग्निःकारणांतरे।कथंदेवमुखोभूत्वायज्ञभागाग्रभुक्तथा।हुतभुक्सर्वलोकेषुसर्वभक्षत्वमेष्यति।श्रुत्वातुतद्व
चस्तेषामग्निमाहूयविश्वकृत्।उवाचवचनंश्लक्ष्णंभूतभावनमव्ययं।लोकानामिहसर्वेषांत्वंकर्त्ताचांतएव
च।त्वंधारयसिलोकांस्त्रीन्क्रियाणांचप्रवर्त्तकः।सतथाकुरुलोकेशनोच्छिद्येरन्यथाक्रियाः।कस्मादेवंवि
मूढस्त्वमीश्वरःसन्हुताशन।त्वंपवित्रंसदालोकेसर्वभूतगतिश्चह।नत्वंसर्वशरीरेणसर्वभक्षत्वमेष्यसि।

अपानेष्वर्चिषो यास्ते सर्वभक्षं भविष्यति ताः। शिखाभिः क्रव्यादा च तनुर्या ते सा सर्वं भक्षयिष्यति। यथा सूर्यांशुभिः स्पृ
ष्टं सर्वं शुचि विभाव्यते। तथा त्वदर्चिर्निर्दग्धं सर्वं शुचि भविष्यति। त्वमग्ने परमं तेजः स्वप्रभावाद्विनिर्गतं। स्वते
जसैव तं शापं कुरु सत्यमृषेर्विभो। देवानां चात्मनो भागं गृहाण त्वं मुखे हुतं सौतिरुवाच एवमस्त्वि
ति तं वह्निः प्रत्युवाच पितामहं। जगाम शासनं कर्त्तुं देवस्य परमेष्ठिनः। देवर्षयश्च मुदितास्ततो जग्मुर्यथागतं
तं। ऋषयश्च यथापूर्वं क्रियाः सर्वाः प्रचक्रिरे। दिवि देवा मुमुदिरे भूतसंघाश्च लौकिकाः। अग्निश्च परमां प्री
तिमवाप हतकल्मषः। एवं स भगवाञ्छापं लेभेऽग्निर्भृगुतः पुरा। एवमेष पुरावृत्त इतिहासोऽग्निशापजः। पुलो
म्नश्च विनाशोऽयं च्यवनस्य च संभवः॥ इत्यादिपर्वणि पौलोमे सूत उवाच स चापि च्य
वनो ब्रह्मन्भार्गवोऽजनयत्सुतं। सुकन्यायां महात्मानं प्रमतिं दीप्ततेजसं। प्रमतिस्तु रुरुं नाम घृताच्यां समजी
जनत्। तस्य ब्रह्मन्रुरोः सर्वं चरितं भूरितेजसः। विस्तरेण प्रवक्ष्यामि तच्छृणु त्वमशेषतः। ऋषिरासीन्मह
न्पूर्वं तपोविद्यासमन्वितः। स्थूलकेश इति ख्यातः सर्वभूतहिते रतः। एतस्मिन्नेव काले तु मेनकायां प्रज
ज्ञिवान्। गंधर्वराजो विप्रर्षे विश्वावसुरिति स्मृतः। अप्सरा मेनका तस्य तं गर्भं भृगुनंदन। उत्ससर्ज यथाका

लंस्थूलकेशाश्रमंप्रति।तत्रत्यक्त्वैवतंगर्भंनद्यास्तीरेजगामसा।अप्सरामेनकाब्रह्मन्निर्दयानिरपत्रपा।
कन्याममरगर्भाभांज्वलंतीमिवचश्रियं।तांददर्शसमुत्सृष्टांनदीतीरेमहानृषिः।स्थूलकेशःसतेजस्वी।
विजनेबंधुवर्जितां।सतांदृष्ट्वातदाकन्यांस्थूलकेशोमहाद्विजः।जग्राहचमुनिश्रेष्ठःकृपाविष्टःपुपोषच।ववृ
धेसावरारोहातस्याश्रमपदेशुभे।जातकर्मक्रियाश्चास्याविधिपूर्वंयथाक्रमं।स्थूलकेशोमहाभागश्चका
रसुमहानृषिः।प्रमदाभ्योवरासातुसत्वरूपगुणान्विता।ततःप्रमद्वरेत्यस्यानामचक्रेमहानृषिः।तामाश्र
मपदेतस्यरुरुर्दृष्ट्वाप्रमद्वरां।बभूवकिलधर्मात्मामदनोपहतस्तदा।पितरंसखिभिःसोथश्रावयामासभा
र्गव।प्रमतिश्चाभ्ययाचत्तांस्थूलकेशंयशस्विनं।ततःप्रादात्पिताकन्यांरुरवेतांप्रमद्वरां।विवाहंस्थापयित्वा
ग्रेनक्षत्रेभगदैवते।ततःकतिपयाहस्यविवाहेसमुपस्थिते।सखीभिःक्रीडतीसार्द्धंसाकन्यावरवर्णिनी।ना
पश्यत्संप्रसुप्तंवैभुजगंतिर्यगायतं।पदाचैनंसमाक्रामन्मुमूर्षुःकालचोदिता।सतस्याःसंप्रपन्नायाश्चोदि
तःकालधर्मणा।विषोपलिप्तान्दशनान्भृशमंगेन्यपातयत्।सादष्टातेनसर्पेणपपातसहसाभुवि।विवर्णावि
गतश्रीकाभ्रष्टाभरणचेतना।निरानंदकरीतेषांबंधूनांमुक्तमूर्द्धजा।व्यसुरप्रेक्षणीयासाप्रेक्षणीयतमाभव

नं।व्यसुस्नेवाभवच्छ्राधिभुविसर्पविषार्दिता।भूयोमनोहरतराबभूवतनुमध्यमा।ददर्शतांपिताचैवतेचैवा
न्येतपस्विनः।विचेष्टमानांपतितांभूतलेपद्मवर्चसं।ततःसर्वेद्विजवराःसमाजग्मुःकृपान्विताः।स्वस्त्यात्रे
योमहाजानुःकुशिकःशंखमेखलः।भरद्वाजःकौणकुत्सआर्ष्टिषेणोथगोतमः।प्रमतिःसहपुत्रेण
तथान्येवनवासिनः।तांतेकन्यांव्यसुंदृष्ट्वाभुजंगस्यविषार्दितां।रुरुदुःकृपयाविष्टारुरुस्त्वार्त्तोविनिर्ययौ
॥ इत्यादिपर्वणिपौलोमे सौतिरुवाच तेषुतत्रोपविष्टेषुब्राह्मणेषुमहात्मसु।रुरुश्चुक्रो
शगहनंवनंगत्वातिदुःखितः।शोकेनाभिहतःसोथविलपन्करुणंबहु।अब्रवीद्वचनंशोचन्प्रियांस्मृत्वा
प्रमद्वरां।शेतेसाभुवितन्वंगीममशोकविवर्द्धिनी।बांधवानांचसर्वेषांकिन्नुदुःखमतःपरं।यदिदत्तंतपस्त
प्तंगुरवोवामयायदि।सम्यगाराधितास्तेनसंजीवतुममप्रिया।यथाचजन्मप्रभृतियतात्माहंधृतव्रतः।
प्रमद्वरातथाद्यैषासमुत्तिष्ठतुभामिनी॥एवंलालप्यतस्तस्यभार्यार्थेदुःखितस्यच।देवदूतस्तदाभ्येत्यवाक्य
माहरुरुंवने देवदूतउवाच अभिधत्सेहयद्वाचारुरोदुःखेनतन्मृषा।यतोमर्त्यस्यधर्मात्म
न्नायुरस्तिगतायुषः।गतायुरेषाकृपणगंधर्वाप्सरसोःसुता।तस्माच्छोकेमनस्तातमाकृथास्त्वंकथंचन।

उपायश्चात्रविहितः पूर्वंदेवैर्महात्मभिः।तंयदीछसिकर्त्तुंत्वंप्राप्स्यसीहप्रमद्वरां रुरुरुवाच कउ
पायः कृतोदेवैर्ब्रूहितत्त्वेनखेचर।करिष्येहंतथाश्रुत्वात्रातुमर्हसिमांभवान् देवदूतउ आयुषो
र्द्धंप्रयछत्वंकन्यायैभृगुनंदन।एवमुत्थास्यतिरुरोतवभार्याप्रमद्वरा रुरुरुवाच आयुषोर्द्धंप्रय
छामिकन्यायैखेचरोत्तम।शृंगारवेशाभरणासमुत्तिष्ठतुमेप्रिया सूतउवाच ततोगंधर्वराजश्च
देवदूतश्चसत्तमौ।धर्मराजमुपेत्येदंवचनंप्रत्यभाषतां।धर्मराजायुषोर्द्धेनरुरोर्भार्याप्रमद्वरा।समुत्तिष्ठ
तुकल्याणीमृतैवंयदिमन्यसि धर्मराजउ प्रमद्वरांरुरोर्भार्यांदेवदूतयदीछसि।उत्तिष्ठत्वायु
षोर्द्धेनरुरोरेवसमन्विता सौतिरुवाच एवमुक्तेततःकन्यासोदतिष्ठप्रमद्वरा।रुरोस्तस्यायुषोर्द्धे
नसुप्तेववरवर्णिनी।एतद्दृष्टंभविष्येहिरुरोरुत्तमतेजसः।आयुषोतिप्रवृद्धस्यभार्यार्थेर्द्धमलुप्यत।तत
इष्टेहनितयोःपितरौचक्रतुर्मुदा।विवाहंतौचरेमातेपरस्परहितैषिणौ।सलब्ध्वादुर्लभांभार्यांपद्मकिंज
ल्कसप्रभां।व्रतंचक्रेविनाशायजिह्मगानांधृतव्रतः।सदृष्ट्वाजिह्मगान्सर्वान्तीव्रकोपसमन्वितः।अभिहंति
यथासत्वंगृह्यप्रहरणंसदा।सकदाचिद्वनंविप्रोरुरुरभ्यागमन्महत्।शयानंतत्रचापश्यद्डुंडुभंवयसान्वितं।तत

उद्यम्य दंडं स कालदंडोपमं तदा। जिघांसुः कुपितो विप्रस्तमुवाचाथ डुंडुभः। नापराध्यामि ते किंचिदहमद्य
तपोधन। संरंभाच्च किमर्थं मामभिहंसि रुषान्वितः॥ इत्यादिपर्वणि पौलोमे ॥ रुरुरुवाच ॥
मम प्राणसमा भार्या दष्टासीद्भुजगेन ह। तत्र मे समयो घोर आत्मनोरग वै कृतः। भुजंगं वै सदा हन्यां यं यं
पश्येयमित्युत। ततो हं त्वां जिघांसामि जीवितेनाद्य मोक्ष्यसे डुंडुभ उवाच अन्ये ते भुजगा ब्रह्मन्ये
दशंतीह मानवान्। डुंडुभानहिगंधेन न त्वं हिंसितुमर्हसि। एकानर्थान्पृथग्धर्मानेकदुःखान्पृथक्सुखान्।
डुंडुभान्धर्मविद्भूत्वा न त्वं हिंसितुमर्हसि सौतिरुवाच इति श्रुत्वा वचस्तस्य भुजगस्य रुरुस्तदा।
नावधीद्भयसंविग्न ऋषिं मत्वाथ डुंडुभं। उवाच चैनं भगवान्रुरुः संशमयन्निव। कामं मां भुजग ब्रूहि को सि
मां विक्रियां गतः॥ डुंडुभ उवाच ॥ अहं पुरा रुरो नाम्ना ऋषिरासं सहस्रपात्। सो हं शापेन विप्रस्य
भुजगत्वमुपागतः रुरुरुवाच किमर्थं शप्तवान्क्रुद्धो द्विजस्त्वां भुजगोत्तम। कियंतं चैव कालं
ते वपुरेतद्भविष्यति इत्यादिपर्वणि पौलोमे डुंडुभ उवाच सखा बभूव मे पूर्वं खगमो नाम
वै द्विजः। भृशं संशितवाक्तात तपोबलसमन्वितः। स मया क्रीडता बाल्ये कृत्वा तार्णमयोरगं। अग्निहोत्रे प्रस

क्रस्तुभीषितःप्रमुमोहवै।लब्ध्वासचपुनःसंज्ञांमामुवाचतपोधनः।निर्द्दहन्निवकोपेनसत्यवाक्शंसितव्रतः
।यथावीर्यस्त्वयासर्पःकृतोयंमद्विभीषया।तथावीर्योभुजंगस्त्वंममशापाद्भविष्यसि।तस्याहंतपसोवीर्यं
जानानस्त्वंतपोधनं।भृशमुद्विग्नहृदयस्तमवोचमहंतदा।प्रणतःसंभ्रमाच्चैवप्रांजलिःपुरतःस्थितः।सखे
तिहसतेदंतेनर्म्मार्थंवैकृतंमया।क्षंतुमर्हसिमेब्रह्मन्शापोयंविनिवर्त्यतां।सोथमामब्रवीद्दृष्ट्वाभृशमुद्वि
ग्नचेतसं।मुहुरुष्णंविनिःश्वस्यसुसंभ्रांतस्तपोधनः।नानृतंवैमयाप्रोक्तंभवितेदंकथंचनं।यत्तुवक्ष्यामि
तेवाक्यंशृणुतन्मेतपोधन।श्रुत्वातहृदितेवाक्यमिदमस्तुसदानघ।उत्पत्स्यतिरुरुर्नामप्रमतेरात्मजःशु
चिः।तंदृष्ट्वाशापमोक्षस्तेभवितानचिरादिव।सत्वंरुरुरितिख्यातःप्रमतेरात्मजोपिच।स्वरूपंप्रतिपद्याहमद्य
वक्ष्यामितेहितं।सडौंडुभंपरित्यज्यरूपंविप्रर्षभस्तदा।स्वरूपंभास्वरंभूयःप्रतिपेदेमहायशाः।इदंचोवाच
वचनंरुरुमप्रतिमौजसं।अहिंसापरमोधर्मःसर्वप्राणभृतांवरः।तस्मात्प्राणभृतःसर्वान्नहिंस्याद्ब्राह्मणःक्व
चित्।ब्राह्मणःसौम्यएवेहभवतीतिपराश्रुतिः।वेदवेदांगविन्नामसर्वभूताभयप्रदः।अहिंसासत्यवचनंक्ष
माचेतिविनिश्चितं।ब्राह्मणस्यपरोधर्मोवेदानांधारणापिच।क्षत्रियस्यहियोधर्मःसहिनेष्येतवैतव।दंडधार

आ०प०
४०

णमुग्रत्वंप्रजानांपरिपालनं।तदिदंक्षत्रियस्यासीत्कर्मवैश्रृणुमेरुरोः।जनमेजयस्ययज्ञेस्मिन्सर्प्पाणांहिंसनं
पुरा।परित्राणंचभीतानांसर्प्पाणांब्राह्मणादपि।तपोवीर्यबलोपेताद्द्विदवेदांगपारगात्।आस्तीकाद्द्विजमुख्या
द्वैसर्पसत्रेद्विजोत्तम आदिपर्व्वणिपौलोमे रुरुरुवाच कथंहिंसितवान्सर्प्पान्सराजाज
नमेजयः।सर्पावाद्विंसितास्तत्रकिमर्थंद्विजसत्तम।किमर्थंमोक्षिताश्चैवपन्नगास्तेनधीमता।आस्तीकेन
द्विजश्रेष्ठश्रोतुमिच्छाम्यशेषतः ऋषिरुवाच श्रोष्यसित्वंरुरोसर्वमास्तीकचरितंमहत्।ब्राह्मण
नांकथयतांत्वरावान्गमनेह्यहं। इत्युक्त्वांतर्हितेयोगात्तस्मिन्नृषिवरेप्रभो।संभ्रमाविष्टहृदयोरुरुर्मेनेतदद्भुती
वलेच्चपरमास्थायययौधावन्नितस्ततः।तमृषिंनष्टमन्विच्छन्संश्रांतोन्यपतद्भुवि।संमोहंपरमंगत्वानष्टसंज्ञइवा
भवत्।तदृषेर्वचनंतथ्यंचिंतयानःपुनःपुनः।लब्धसंज्ञोरुरुश्चायात्तदाचख्यौपितुस्तदा।पितावास्यतदाख्या ४०
नंदृष्टःसर्वम्न्यवेदयत्॥ इत्यादिपर्व्वणिसर्पसत्रप्रस्तावनापौलोमंचसमाप्तं शौनकउवाच ॥
किमर्थंराजशार्दूलःसराजाजनमेजयः।सर्पसत्रेणसर्पाणांगतोंतंतद्वदस्वमे।निखिलेनयथातत्वंसौतेसर्पम
शेषतः।आस्तीकश्चद्विजश्रेष्ठःकिमर्थंजयतांवरः।मोक्षयामासभुजगान्प्रदीप्ताद्वसुरेतसः।कस्यपुत्रःसराजास्री

सर्पसत्रंयथाहरत्।सचद्विजातिप्रवरःकस्यपुत्रोभिधत्स्वमे   सौतिरुवाच   महदाख्यानमास्तीकं
यथैतत्प्रोच्यतेद्विज।ससर्वमेतदशेषेणशृणुमेवदतांवरः   शौनकउ   श्रोतुमिच्छाम्यशेषेणकथामे
तांमनोरमां।आस्तीकस्यपुराणर्षेर्ब्राह्मणस्ययशस्विनः॥   सौतिरुवाच   ॥इतिहासमिमंविप्राःपुराणं
परिचक्षते।कृष्णद्वैपायनप्रोक्तंनैमिषारण्यवासिषु।पूर्वंप्रचोदितःसूतःपितामेलोमहर्षणः।शिष्योव्यासस्य
मेधावीब्राह्मणेष्विदमुक्तवान्।तस्मादहमुपश्रुत्यप्रवक्ष्यामियथातथं।इदमास्तीकमाख्यानंतुभ्यंशौनकपृच्छ
ते।कथयिष्याम्यशेषेणसर्वपापप्रणाशनं।आस्तीकस्यपिताह्यासीत्प्रजापतिसमःप्रभुः।ब्रह्मचारीयताहार
स्तपस्युग्रेरतःसदा।जरत्कारुरितिख्यातऊर्द्ध्वरेतामहातपाः।यायावराणांप्रवरोधर्मज्ञःसंशितव्रतः।सक
दाचिन्महाभागस्तपोबलसमन्वितः।चचारपृथिवींसर्वांयत्रसायंगृहोमुनिः।तीर्थेषुचसमाप्लावंकुर्वन्नट
तिसर्वशः।चरन्दीक्षांमहातेजादुश्चरामकृतात्मभिः।वायुभक्षोनिराहारःशुष्यन्ननिमिषोमुनिः।इतस्ततः
परिचरन्दीप्तपावकसप्रभः।अटमानःकदाचित्स्वान्सददर्शपितामहान्।लंबमानान्महागर्त्तेपादैरूर्द्ध्वैरवाङ्मु
खान्।तानब्रवीत्सदृष्ट्वैवजरत्कारुःपितामहान्।केभवंतोवलंवंतेगर्त्तेह्यस्मिन्नधोमुखाः।वीरणस्तंवकेल

ग्नाःसर्वतःपरिभक्षिते।मूखकेननिगूढेनगर्त्तेस्मिन्नित्यवासिना॥ पितरऊचुः ॥यायावरानामवयमृष
यःसंशितव्रताः।संतानप्रक्षयाद्ब्रह्मन्नधोगच्छाममेदिनीं।अस्माकंसंततिस्त्वेकोजरत्कारुरितिस्मृतः।मंदभाग्यो
ल्पभाग्यानांतपएकंसमास्थितः।नसपुत्रान्जनयितुंदारान्मूढश्चिकीर्षति।तेनलंबामहेगर्त्तेसंतानस्यक्षयादि
ह।अनाथास्तेननाथेनयथादुष्कृतिनस्तथा।कस्त्वंबंधुरिवास्माकमनुसोचसिसत्तम।ज्ञातुमिच्छामहेब्रह्मन्
कोभवानिहनःस्थितः।किमर्थंचैवनःशोच्याननुशोचसिसत्तम जरत्कारुरुवाच ममपूर्वेभ
वंतोवैपितरःसपितामहाः।ब्रूतकिंकरवाण्यद्यजरत्कारुरहंस्वयं पितरऊचुः यतस्वयत्नवांस्ता
तसंतानायकुलस्यनः।आत्मनोर्थेस्मदर्थेचधर्मइत्येववाविभो।नहिधर्मफलैस्तातनतपोभिःसुसंचितैः।
तांगतिंप्राप्नुवंतीहपुत्रिणोयांव्रजंतिवै।तद्दारग्रहणेयत्नंसंतत्यांचमनःकुरु।पुत्रकास्मन्नियोगात्त्वमेतन्नः
परमंहितं जरत्कारुरुवाच नदारान्वैकरिष्येहंनधनंजीवितार्थतः।भवतांतुहितार्थायकरिष्येदा
रसंग्रहं।समयेनचकर्त्ताहमनेनविधिपूर्वकं।तथायद्युपलप्स्यामिकरिष्येनान्यथाह्यहं।सनाम्नीयाभवित्री
मेदित्सिताचैवबंधुभिः।भैक्ष्यवत्तामहंकन्यामुपयंस्येविधानतः।दरिद्रायहिमेभार्यांकोदास्यतिविशेष

तः।प्रतिग्रहीष्येमिद्रांतुयदिकश्चित्प्रदास्यति।एवंदारक्रियाहेतोःप्रयतिष्येपितामहाः।अनेनविधिनाशश्व
त्करिष्येहमन्यथा।तत्रचोत्पत्स्यतेजंतुर्भवतांतारणायवै।शाश्वतंस्थानमासाद्यमोदंतांपितरोमम ॥
सौतिरुवाच ततोनिवेशायतदासविप्रःशंसितव्रतः।महींचचारदारार्थीनचदारानविंदत।सकदाचि
द्वनंगत्वाविप्रःपितृवचःस्मरन्।चुक्रोशकन्याभिक्षार्थीतिस्रोवाचःशनैरिव।तंवासुकिःप्रत्यगृह्णादुद्यम्यभ
गिनींतदा।नसतांप्रतिजग्राहनसनाम्नीतिचिंतयन्।सनाम्नीमुद्यतांभार्यांगृह्णीयामितितस्यहि।मनोनि
विष्टमभवज्जरत्कारोर्महात्मनः।तमुवाचमहाप्राज्ञोजरत्कारुर्महातपाः।किंनाम्नीभगिनीयंतेब्रूहिसत्यं
भुजंगम वासुकिरुवाच जरत्कारोजरत्कारुःस्वसेयमनुजाममा।प्रतिगृह्णीष्वभार्यार्थेमयादत्तां
सुमध्यमां।त्वदर्थंरक्षितापूर्वंप्रतीच्छेमांद्विजोत्तम।एवमुक्त्वाततःप्रादाद्भार्यार्थेवरवर्णिनीं।सचतांप्रति
जग्राहविधिदृष्टेनकर्मणा॥ सौतिरुवाच ॥मात्राहिभुजगाःशप्ताःपूर्वंब्रह्मविदांवर।जनमेजयस्य
वोयज्ञेधक्ष्यत्यनिलसारथिः।तस्यशापस्यशांत्यर्थंपन्नगोत्तमः।स्वसारमृषयेतस्मैसुव्रतायमहात्मने।स
चतांप्रतिजग्राहविधिदृष्टेनकर्मणा।आस्तीकोनामपुत्रश्चतस्यांजज्ञेमहामनाः।तपस्वीचमहात्माचवेदवेदां

आ०प०
४२

गपारगः।समः सर्वस्यलोकस्यपितृमातृभयापहः।अथदीर्घस्यकालस्यपांडवेयोनराधिपः।आजहारम
हायज्ञंसर्पसत्रमितिश्रुतिः।तस्मिन्प्रवृत्तेसत्रेतुसर्पाणामंतकायवै।मोचयामासतान्नागानास्तीकःसु
महातपाः।भ्रातृंश्चमातुलांश्चैवतथैवान्यान्सपन्नगान्।पितृंश्चतारयामाससंतत्यातपसातथा।व्रतैश्च
विविधैर्ब्रह्मन्स्वाध्यायैश्चानृणोभवत्।देवांश्चतर्पयामासयज्ञैर्विविधदक्षिणैः।ऋषींश्चब्रह्मचर्येण
संतत्याचपितामहान्।अपहृत्यगुरुंभारंपितृणांशंसितव्रतः।जरत्कारुर्गतःस्वर्गंसहितःस्वैःपिताम
हैः।आस्तीकंचसुतंप्राप्यधर्मंचानुत्तमंमुनिः।जरत्कारुःसुमहताकालेनस्वर्गमेयिवान्।एतदाख्यान
मास्तीकंयथावत्कथितंमया।प्रब्रूहिभृगुशार्दूलकिमन्यत्कथयामिते इत्यादिपर्वण्यास्तीके
॥ शौनकउवाच सौतेत्वंकथयस्वेमांविस्तरेणकथांपुनः।आस्तीकस्यकवेःसाधोःशुश्रू ४२
षापरमाहिनः।मधुरंकथ्यतेसौम्यश्लक्ष्णाक्षरपदंत्वया।प्रीयामहेभृशंतातपितेवेदंप्रभाषसे।अस्म
च्छुश्रूषणेनित्यंपितातेहिनिरतस्तव।आचष्टैतद्यथाख्यानंपितातेत्वंतथावद॥ सौतिरु ॥
आयुष्मन्निदमाख्यानमास्तीकंकथयामिते।यथाश्रुतंकथयतःसकाशाद्वैपितुर्मया।पुरादेवयु

गेब्रह्मन्पितामहसुतेशुभे।आस्तांभगिन्यौरूपेणसमुपेतेद्भुतेनघ।तेभार्येकश्यपस्यास्तांकद्रूश्चवि
नताचह।प्रादात्ताभ्यांवरंप्रीतःप्रजापतिसमःपतिः।कश्यपोधर्मपत्नीभ्यांमुदापरमयायुतः।वरा
तिसर्गंश्रुत्वैवंकश्यपादुत्तमंचते।हर्षादप्रतिमांप्रीतिंप्रापतुस्मवरस्त्रियौ।वव्रेकद्रूःसुतान्नागान्
सहस्रंतुल्यवर्चसः।द्वौपुत्रौविनतावव्रेकद्रूपुत्राधिकौबले।तेजसावपुषाचैवविक्रमेणाधिकौ
चतौ।तस्मैभर्त्तावरंप्रादादध्यर्द्धंपुत्रमीप्सितं।एवमस्त्वितितंचाहकश्यपंविनतातदा।यथावत्प्रार्थि
तंलब्ध्वावरंतुष्टाभवत्तदा।कृतकृत्यानुविनतालब्ध्वावीर्याधिकौसुतौ।कद्रूश्चलब्ध्वापुत्राणांसहस्रं
तुल्यवर्चसां।धार्यौप्रयत्नतोगर्भावित्युक्त्वासमहातपाः।तेभार्येवरसंतुष्टेकश्यपोवनमाविशत्
॥ सौतिरुवाच ॥कालेनमहताकद्रूरंडानांदशतीर्दश।जनयामासविप्रेंद्रद्वेअंडेविनतात
दा।तयोरंडानिनिदधुःप्रहृष्टाःपरिचारिकाः।सोपस्वेदेषुभांडेषुपंचवर्षशतानिच।ततःपंचशतेकाले
कद्रूपुत्राविनिःसृताः।अंडाभ्यांविनतायास्तुमिथुनंनव्यदृश्यत।ततःपुत्रार्थिनीदेवीव्रीडिताचतप
स्विनी।अंडंबिभेदविनतातत्रपुत्रमपश्यत।पूर्वार्द्धकायसंपन्नमितरेणाप्रकाशता।सपुत्रोरोष

संपन्नः सशापेनामिति श्रुतिः। योहमेवंकृतो मातस्त्वया लोभपरीतया। शरीरेणासमग्रेण तस्माद्दा
सी भविष्यसि। पंचवर्षशतान्यस्या यया विस्पर्द्धसे सह। एष च त्वां सुतो मातर्दासीत्वान्मोचयिष्यति।
यद्येनमपि मातस्त्वं मामिवांडविभेदनात्। न करिष्यस्यनंगं वान्यंगं वापि तपस्विनी। प्रतिपालयित
व्यस्ते जन्मकालोस्य धीरया। विशिष्टं बलमीप्संत्या पंचवर्षशतात्परः। एवं शप्त्वा ततः पुत्रो विनतामंतरि
क्षगः। अरुणो दृश्यते ब्रह्मन्प्रभातसमये सदा। आदित्यरथमध्यास्ते सारथ्यं समकल्पयन्। गरुडो
पि यथाकालं जज्ञे पन्नगभोजनः। स जातमात्रो विनतां परित्यज्य खमाविशत्। आदास्यन्नात्मनो भोज्य
मन्नं विहितमस्य यत्। विधात्रा भृगुशार्दूल क्षुधितः पन्नगेश्वरः॥ इत्यादिपर्व्वण्यास्तीके ॥

सूत उवाच एतस्मिन्नेव काले तु भगिन्यौ ते तपोधन। अपश्यतां समायांतमुच्चैःश्रवसमंतिका
त्। यं तं देवगणाः सर्वे हृष्टरूपमपूजयन्। मथ्यमानेमृते जातमश्वरत्नमनुत्तमं। अमोघबलमश्वाना
मुत्तमं जवनां वरं। श्रीमंतमजरं दिव्यं सर्वलक्षणपूजितं शौनक उवाच कथं तदमृतं देवैर्म
थितं क्व च शंस मे। यत्र जज्ञे महावीर्यः सोश्वराजो महाद्युतिः॥ सौतिरुवाच ॥ज्वलंतमचलं

मेरुं तेजोराशिमनुत्तमं। आक्षिपंतं प्रभां भानोः स्वशृंगैः कांचनोज्वलैः। कनकाभरणं चित्रं देवगंध
र्वसेवितं। अप्रमेयमनाधृष्यमधर्मबहुलैर्जनैः। व्यालैरावारितं घोरैर्दिव्यौषधिविदीपितं। नाक
मावृत्य तिष्ठंतमुच्छ्रयेण महागिरिं। अगम्यं मनसाप्यन्यैर्नदीवृक्षसमन्वितं। नानापतंगसंघैश्च ना
दितं सुमनोहरैः। तस्य शृंगमुपारुह्य बहुरत्नाचितं शुभं। अनंतकल्पमद्विद्धं सुराः सर्वे महौजसः
ते मंत्रयितुमारब्धास्तत्रासीना दिवौकसः। अमृताय समागम्य तपोनियमसंयुताः। तत्र नाराय
णो देवो ब्रह्माणमिदमब्रवीत्। चिंतयत्सु सुरेष्वेवं मंत्रयत्सु च सर्वशः। देवैरसुरसंघैश्च मथ्यतां
कलशोदधिः। भविष्यत्यमृतं तत्र मथ्यमाने महोदधौ। सर्वौषधीः समावाप्य सर्वरत्नानि चैव हि।
मंथध्वममृतं देवा लप्स्यध्वममृतं ततः॥ इत्यादिपर्वण्यमृतमथने सौतिरुवाच ॥
ततोऽभ्रशिखराकारैर्गिरिशृंगैरलंकृतं। मंदरं पर्वतवरं लताजालसमाकुलं। नानाविहगसंघुष्टं
नानादंष्ट्रिसमाकुलं। किन्नरैरप्सरोभिश्च देवैरपि च सेवितं। एकादश सहस्राणि योजनानां समु
च्छ्रितं। अधो भूमेः सहस्रेषु तावत्स्वेव प्रतिष्ठितं। तमुद्धर्तुमशक्ता वै सर्वे देवगणास्तदा। विष्णुमा

सीनमभ्येत्यब्रह्माणं चेदमब्रुवन्। भवंतावत्र कुर्वीतां बुद्धिं नैःश्रेयसीं परां। मंदरोद्धरणे यत्नः क्रियतां च
हिताय नः सौतिरुवाच तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गव। अचोदयदमेयात्मा फणीं
द्रं पद्मलोचनः। ततोनंतः समुत्थाय ब्रह्मणा परिनोदितः। नारायणेन चाप्युक्तस्तस्मिन्कर्मणि वीर्यवान्।
अथ पर्वतराजानं तमनंतो महाबलः। उज्जहार बलाद्ब्रह्मन्सवनं सवनौकसं। ततस्तेन सुराः सार्द्धं समु
पतस्थिरे। तमूचुरमृतस्यार्थे निर्मथिष्यामहे जलं। अपां पतिरथोवाच ममाप्यंशो भवेत्ततः। सोढा
स्मि विपुलं मर्द्दं मंदरभ्रमणादिति। ऊचुश्च कूर्मराजानमकूपारं सुरासुराः। अधिष्ठानं गिरेरस्य भ
वान्भवितुमर्हति। कूर्मेण तु तथेत्युक्त्वा पृष्ठमस्य समर्पितं। तं शैलं तस्य पृष्ठस्थं यंत्रेणेंद्रोभ्यपीडयत्।
मंथानं मदरं कृत्वा तथा नेत्रं च वासुकिं। देवा मथितुमारब्धाः समुद्रं निधिमंभसां। अमृतार्थं ततो ब्रह्मन्
सहिता दैत्यदानवाः। एकमंतमुपाश्लिष्टा नागराज्ञो महासुराः। विबुधाः सहिताः सर्वे यतः पुछं ततः स्थि
ताः। अनंतो भगवान्देवो यतो नारायणस्ततः। शिर उत्क्षिप्य नागस्य पुनः पुनरवाक्षिपत्। वासुकेरथ ना
गस्य सहसाक्षिप्यतः सुरैः। सधूमाः सार्चिषो वाता निष्पेतुरसकृन्मुखात्। ते धूमसंघाः संभूता मेघसंघाः

सविद्युताः।अभ्यवर्षन्सुरगणान्।द्रुमसंतापकर्षितान्।तस्माच्चगिरिकूटाग्रात्प्रच्युताःपुष्पवृष्टयः।सुरासु
रगणान्सर्वान्समंतात्समवाकिरन्।बभूवात्रमहानादोमहामेघरवोपमः।उदधेर्मथ्यमानस्यमंदरेणसु
रासुरैः।तत्रनानाजलचराविनिष्पिष्टामहाद्रिणा।विलयंसमुपाजग्मुःशतशोलवणांभसि।वारुणानि
चभूतानिविविधानिमहीधरः।पातालतलवासीनिविलयंसमुपानयत्।तस्मिंश्चभ्राम्यमाणेद्रौसंघृ
ष्यंतःपरस्परं।न्यपतन्पतगोपेताःपर्वताग्रान्महाद्रुमाः।तेषांसंघर्षजश्चाग्निरर्चिभिःप्रज्वलन्मुहुः।वि
द्युद्भिरिवनीलाभ्रमावृणोन्मंदरंगिरिं।ददाहकुंजरांस्तत्रसिंहांश्चैवविनिर्गतान्।विगतासूनिसर्वाणिसत्वा
निविविधानिच।तमग्निममरश्रेष्ठःप्रदहंतमितस्ततः।वारिणामेघजेनेंद्रःशमयामाससर्वशः।ततोना
नाविधास्तत्रसुस्रुवुःसागरांभसि।महाद्रुमाणांनिर्यासाबहवश्चौषधीरसाः।तेषाममृतवीर्याणांरसाना
पयसैवच।अमरत्वंसुराजग्मुःकांचनस्यचनिश्रवात्।ततस्तस्यसमुद्रस्यतज्जातमुदकंपयः।रसोत्तमैर्वि
मिश्रंचततःक्षीरादभूद्घृतं।ततोब्रह्माणमासीनंदेवावरदमब्रुवन्।श्रांताःस्मसुभृशंब्रह्मन्नोद्भवत्यमृतंच
तत्।विनानारायणंदेवंसर्वेन्येदेवदानवाः।चिरारब्धमिदंचापिसागरस्यापिमंथनं।ततोनारायणंदेवंब्रह्माव

वनमब्रवीत्। विदधत्वेषां बलं विष्णो भवानत्र परायणं विष्णुरुवाच बलं ददामि सर्वेषां कर्मैतद्ये
समास्थिताः। क्षोभ्यतां कलशः सर्वैर्मंदरः परिवर्तितां सूत उ नारायणवचः श्रुत्वा बलिनस्ते म
होदधेः। तत्पयः सहिताभूयश्चक्रिरे भृशमाकुलं। ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात्। प्रसन्नात्मा
समुत्पन्नः सोमः शीतांशुरुज्वलः। श्रीरनंतरमुत्पन्ना घृतात्पांडुरवासिनी। सुरादेवी समुत्पन्ना तुरगः पांडु
रस्तथा। कौस्तुभस्तु मणिर्दिव्य उत्पन्नो घृतसंभवः। मरीचिविकचः श्रीमान्नारायण उरोगतः। श्रीः सु
राश्चैव सोमश्च तुरगश्च मनोजवः। यतो देवास्ततो जग्मुरादित्यपथमाश्रिताः। धन्वंतरिस्ततो देवो वपुष्मा
नुदतिष्ठत। श्वेतं कमंडलुं बिभ्रदमृतं यत्र तिष्ठति। एतदत्यद्भुतं दृष्ट्वा दानवानां समुत्थितः। अमृतार्थे महा
न्नादो ममेदमिति जल्पतां। श्वेतैर्दंतैश्चतुर्भिस्तु महाकायस्ततः परं। ऐरावणो महानागो भवद्वज्रभृता धृतः
अतिनिर्मथनादेव समजायत्तथापरः। जगदावृत्य सहसा सधूमोग्निरिवज्वलन्। त्रैलोक्यं मोहितं यस्य गं
धमाघ्राय तद्विषं दधार भगवान्कंठे मंत्रमूर्त्तिर्महेश्वरः। तदाप्रभृति देवस्तु नीलकंठ इति श्रुतिः। एतत्तदद्भु
तं दृष्ट्वा निराशाः दानवाः स्थिताः। अमृतार्थे बलस्यार्थे महांतं वैरमास्थिताः। ततो नारायणो मायां मोहिनीं

समुपाश्रितः। स्त्रीरूपमद्भुतं कृत्वा दानवानभिसंश्रितः। ततस्तदमृतं तस्यै ददुस्ते मूढचेतसः। स्त्रियै दानव
दैतेयाः सर्वे तद्गतमानसाः   इत्यादिपर्वण्यमृतमथने   सौतिरुवाच   अथावरणमुख्या
नि नानाप्रहरणानि च। प्रगृह्याभ्यद्रवन्देवान्सहिता दैत्यदानवाः। ततस्तदमृतं देवो विष्णुरादाय वीर्यवान्। ज
हार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः। ततो देवगणाः सर्वे पपुस्तदमृतं तदा। विष्णोः सकाशात्संप्राप्य संभ्रमे तु
मुले सति। ततः पिबत्सु तत्कालं देवेष्वमृतमीप्सितं। राहुर्विबुधरूपेण दानवः प्रापिबत्तदा। तस्य कंठमनु
प्राप्ते दानवस्यामृते तदा। आख्यातं चंद्रसूर्याभ्यां सुराणां हितकाम्यया। ततो भगवता तस्य शिरश्छिन्नमलंकृ
तं। चक्रायुधेन चक्रेण पिबतोमृतमोजसा। तच्छैलशृंगप्रतिमं दानवस्य शिरो महत्। चक्रच्छिन्नं खमुत्पत्य ननाद
दातिभयंकरं। तत्कबंधं पपातास्य विस्फुरद्धरणीतले। सपर्वतवनद्वीपां दैत्यस्याकंपयन्महीं। ततो वैरविनि
र्बंधः कृतो राहुमुखेन वै। शाश्वतश्चंद्रसूर्याभ्यां ग्रसत्यद्यापि चैव तौ। विहाय भगवांश्चापि स्त्रीरूपमतुलं हरिः।
नानाप्रहरणैर्भीमैर्दानवान्समकंपयत्। ततः प्रवृत्तः संग्रामः समीपे लवणांभसः। सुराणामसुराणां च सर्व
घोरतरो महान्। प्रासाश्च विपुलास्तीक्ष्णान्यपतंत सहस्रशः। तोमराश्च सुतीक्ष्णाग्राः शस्त्राणि विविधानि च। ततो

सुराश्चक्रभिन्ना वमंतो रुधिरं बहु। असिशक्तिगदारुग्णा निपेतुर्धरणीतले। छिन्नानि पट्टिशैश्चैव शिरांसि
युधि दारुणैः। तप्तकांचनमालीनि निपेतुरनिशं तदा। रुधिरेणावलिप्तांगा निहताश्च महासुराः। अद्रीणा
मिव कूटानि धातुरक्तानि शेरते। हाहाकारः समभवत्तत्र तत्र सहस्रशः। अन्योन्यं छिंदतां शस्त्रै रादित्ये लो
हितायति। परिघैरायसैस्तीक्ष्णैः सन्निकर्षे च मुष्टिभिः। निघ्नतां समरेन्योन्यं शब्दो दिवमिवास्पृशत्। छिंधि
भिंधि प्रधाव त्वं पातयाभिसरेति च। व्यश्रूयन्त महाघोराः शब्दास्तत्र समंततः। एवं सुतुमुले युद्धे वर्तमाने म
हाभये। नरनारायणौ देवौ समाजग्मतुराहवं। तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि। चिंतयामास तच्चक्रं वि
ष्णुर्दानवसूदनं॥ ततोंबराच्चिंतितमात्रमागतं महाप्रभं चक्रममित्रतापनं। विभावसोस्तुल्यमकुंठमंडलं सुद
र्शनं संयति भीमदर्शनं। तदागतं ज्वलितहुताशनप्रभं भयंकरं करिकरबाहुरच्युतः। मुमोच वै बलवद
थोग्रवेगवान् महाप्रभं परनगरावदारणं। तदंतकज्वलनसमानवर्चसं पुनः पुनर्न्यपतत वेगवत्तदा। वि
दारयद्दितिदनुजान्सहस्रशः करेरितं पुरुषवरेण संयुगे। दहत्क्वचिज्ज्वलन इवावलेलिहत्प्रसह्य तान
सुरगणान्न्यकृंतत। प्रवेरितं वियति मुहुः क्षितौ तथा पपौ रणे रुधिरमथो पिशाचवत्। तथासुरा गिरिभि

रदीनचेतसोमुकुर्मुहुः सुरगणमर्द्दयंस्तदा। महावलाविगलितमेघवर्चसः सहस्रशोगगनमभिप्रपद्यह
श्रथांवराद्ध्ययजननाः प्रपेदिरेसपादपावकुविधमेघरूपिणः। महाद्रयः परिगलिताग्रसानवपरस्परंद्रुत
मभिहत्यसस्वनाः। ततोमहीप्रविचलितासकाननामहाद्रिपाताभिहतासमंततः। परस्परंभृशमभिगर्ज्जतां
मुहूरणाजिरेभृशमभिसंप्रवर्त्तिते। नरस्ततोवरकनकाग्रभूषणैर्म्महेषुभिर्गगनपथंसमावृणोत्। विदारय
न्गिरिशिखराणिपत्रिभिर्म्महाभयेऽसुरगणविग्रहेतदा। ततोमहीलवणजलंचसागरंमहासुराः प्रविविशु
रर्द्दिताः सुरैः। वियद्गतंज्वलितहुताशनप्रभंसुदर्शनंपरिकुपितंनिशाम्यते। ततः सुरैर्व्विजयमवाप्यमंद
रः स्वमेवदेशंगमितः सुपूजितः। विनाद्यखंदिवमपिचैवसर्वशस्ततोगताः सलिलधरा[illegible]यथागतं। ततोऽमृ
तंसुनिहितमेवचक्रिरेसुराः परांमुदमधिगम्यपुष्कलां। ददौचतंनिधिममृतस्यरक्षितुंकिरीटिनेवलभिद
थामरैः सह इत्यादिपर्व्वण्यमृतमथनंसमाप्तम् सौतिरुवाच एतत्तेकथितंसर्वममृतं
मथितंयथा। यत्रसोऽश्वः समुत्पन्नः श्रीमानतुलविक्रमः। यंनिशाम्यतदाकद्रूर्विनतामिदमब्रवीत्। उ
च्चैः श्रवाहिकिंवर्णोभद्रेप्रब्रूहिमाचिरं विनतोवाच श्वेतएवाश्वराजोयंकिंवात्वंमन्यसेशुभे। ब्रू

आ०प०
४७

हिवर्णसि त्वमप्यस्य ततोत्रविपणावहे कद्रूरुवाच कृष्णवर्णमहं मन्ये हयमेनं शुचिस्मिते। एहि सा
र्द्धं मयादीव्य दासीभावाय भामिनि॥ सौतिरुवाच एवं ते समयं कृत्वा दासीभावाय वै मिथः। जग्म
तुः स्वगृहानेव श्वो द्रक्ष्याव इति स्म ह। ततः पुत्रसहस्रं तु कद्रूर्जिह्मं चिकीर्षती। आज्ञापयामास तदा वाला
भूत्वांजनप्रभाः। आविशध्वं हयं क्षिप्रं दासी न स्यामहं यथा। नान्वपद्यंत ये वाक्यं तान् शशाप भुजंगमा
न्। सर्पसत्रे वर्त्तमाने पावको वः प्रधक्ष्यति। जनमेजयस्य राजर्षेः पांडवेयस्य धीमतः। शापमेनं तु शु
श्राव स्वयमेव पितामहः। अतिक्रूरं समुत्सृष्टं कद्र्वा दैवादतीव हि। सार्द्धं देवगणैः सर्वैर्वाचं तामन्वमोद
त। बहुत्वं प्रेक्ष्य सर्पाणां प्रजानां हितकाम्यया। तिग्मवीर्यविषा ह्येते दंदशूका महाबलाः। तेषां तीक्ष्णविष
त्वाद्धि प्रजानां च हिताय च। युक्तं मात्रा कृतं तेषां परपीडोपसर्पिणां। अन्येषामपि सत्वानां नित्यं दोषपरास्तु
ये। तेषां प्राणांतिको दंडो दैवेन विनिपात्यते। एवं संभाष्य देवस्तु पूज्य कद्रूं च तां तदा। आहूय कश्यपं देव इ
दं वचनमब्रवीत्। यदेते दंदशूकाश्च सर्पा जातास्त्वयानघ। विषोल्बणा महाभोगा मात्रा शप्ताः परंतप। त
त्र मन्युस्त्वया तात न कर्त्तव्यः कथंचन। दृष्टं पुरातनं ह्येतद्यज्ञे सर्पविनाशनं। तेषां तीक्ष्णविषत्वाद्धि प्रजा

४७

नांचहितायच॥इत्युक्त्वासत्कृत्यदेवस्तंप्रसाद्यप्रजापतिं॥प्रादाद्विषहरींविद्यांकश्यपायमहात्मने
इत्यादिपर्वणिसौपर्णे सौतिरुवाच ततोरजन्यांव्युष्टायांप्रभातेभ्युदितेरवौ।कद्रूश्चविनताचै
वभगिन्यौतेतपोधन।अमर्षितेतुसंरब्धेदास्येकृतपणेतदा।जग्मतुस्तुरगंद्रष्टुमुच्चैःश्रवसमंतिकात्।
ददृशातेथतेतत्रसमुद्रंनिधिमंभसां।महांतमुदकागाधंक्षोभ्यमानंमहास्वनं।तिमिंगिलझषाकीर्णंमक
रैरावृतंतथा।सत्वैश्चबहुसाहस्रैर्नानारूपैःसमावृतं।भीषणैर्विकृतैरन्यैर्घोरैर्जलचरैस्ततः।उग्रैर्नित्यम
नाधृष्यंकूर्मग्राहसमाकुलं।आकरंसर्वरत्नानामालयंवरुणस्यच।नागानामालयंरम्यमुत्तमंसरितांपतिं
पातालज्वलनावासमसुराणांचबांधवं।भयंकरंचसत्वानांपयसांनिधिमर्णवं।शुभंदिव्यममर्त्यानाममृ
तस्याकरंपरं।अप्रमेयमचिंत्यंचसुपुण्यजलमद्भुतं।घोरंजलचरारावरौद्रंभैरवनिस्वनं।गंभीरावर्त्तकलि
लंसर्वभूतभयंकरं।वेलादोलानिलचलंक्षोभोद्वेगसमुच्छ्रितं।वीचीहस्तैःप्रचलितैर्नृत्यंतमिवसर्वतः।चंद्रवृ
द्धिक्षयवशादुद्वृत्तोर्मिसमाकुलं।पांचजन्यस्यजननंरत्नाकरमनुत्तमं।गांविंदताभगवतागोविंदेनामितौ
जसा।वराहरूपिणाचांतर्विक्षोभितजलाविलं।ब्रह्मर्षिणाव्रतवतावर्षाणांशतमत्रिणा।अनासादितगाधं

चपातालतलमव्ययं।आध्यात्मयोगनिद्रांचपद्मनाभस्यसेवतः।युगादिकालशयनंविष्णोरमिततेजसः।
वज्रपातनसंत्रस्तमैनाकस्याभयप्रदं।तिग्माहवार्दितानांचअसुराणांपरायणं।वडवामुखदीप्ताग्नेस्तो
यहव्यप्रदंशिवं।अगाधपारंविस्तीर्णमप्रमेयंसरित्पतिं।महानदीभिर्बह्वीभिःस्पर्द्धयेवसहस्रशः।अभि
सार्यमाणमनिशंददृशातेमहार्णवं।आपूर्यमाणमत्यर्थंनृत्यमानमिवोर्मिभिः।गंभीरंतिमिमकरोग्रसं
कुलंतंगर्जंतंजलचरारावरौद्रनादैः।विस्तीर्णंददृशातुरंबरप्रकाशंतेगाधंनिधिमुरुमंभसामनंतं
इत्यादिपर्वणिसौपर्णे सौतिरुवाच नागाश्चसंविदंकृत्वाकर्त्तव्यमितितद्वचः।निःस्नेहावै
दहेन्माताअसंप्राप्तमनोरथाः।प्रसन्नामोक्षयेदस्मान्नस्माच्छापाच्चभाविनी।कृष्णंपुच्छंकरिष्यामस्तुरग
स्यनसंशयः।तथाहिगत्वातेतस्यपुच्छेवालाइतिस्थिताः।एतस्मिन्नंतरेतेतुसपत्न्यौपणितेतदा।ततस्तेप
णितंकृत्वाभगिन्यौद्विजसत्तम।जग्मतुःपरयाप्रीत्यापरंपारंमहोदधेः।कद्रूश्चविनताचैवदाक्षायण्यौविह
यसा।आलोकयंत्यावक्षोभ्यंसमुद्रंनिधिमंभसां।वायुनातीवसहसाक्षोभ्यमानंमहास्वनं।तिमिंगिलसर
माकीर्णंमकरैरावृतंतथा।संयुतंबहुसाहस्रैःसत्वैर्नानाविधैरपि।घोरैर्घोरमनाधृष्यंगंभीरमतिभैरवं।

आकरंसर्वरत्नानांमालयंवरुणस्यचनागानामालयंचापिसुरम्यंसरितांपतिं।पातालज्वलनावासम
सुराणांतथालयं।भयंकराणांसत्वानांपयसोनिधिमव्ययं।शुभ्रंदिव्यममर्त्यानाममृतस्याकरंपरं।अप्र
मेयमचिंत्यंचसुपुण्यजलसम्मितं।महानदीभिर्बह्वीभिस्तत्रतत्रसहस्रशः।आपूर्यमाणमत्यर्थंनृत्यंत
मिवचोर्मिभिः।इत्येवंतरलतरोर्मिसंकुलंतंगंभीरंविकशितमंवरप्रकाशं।पातालज्वलनशिखावदी
पितंगंगर्जितंद्रुतमभिजग्मतुस्ततस्ते इत्यादिपर्वणिसौपर्णे सूतउवाच तंसमु
द्रमतिक्रम्यकद्रूर्विनतयासह।न्यपतत्तुरगाभ्यासेनचिरादिवशीघ्रगा।ततस्तेतंहयश्रेष्ठंददृशातेमहा
जवं।शशांककिरणप्रख्यंकालवालमुभेतदा।निशाम्यचबहून्वालान्कृष्णान्पुच्छसमाश्रितान्।विषण्ण
रूपांविनतांकद्रूर्दास्येन्ययोजयत्।ततःसाविनतातस्मिन्पणितेनपराजिता।अभवद्दुःखसंतप्तादासी
भावंसमास्थिता॥एतस्मिन्नंतरेचापिगरुडःकालआगते।विनामात्रामहातेजाविदार्यांडमजायत।महा
सत्वबलोपेतःसर्वविद्योतयन्दिशः।कामरूपःकामगमःकामवीर्योविहंगमः।अग्निराशिरिवोद्भासन्समि

द्धोऽतिभयंकरः।विद्युद्धिस्पष्टपिंगाक्षो युगांताग्निसमप्रभः।प्रवृद्धः सहसापक्षी महाकायो नभोगतः।घो
रो घोरस्वनो रौद्रो वह्निरौर्व इवापरः।तं दृष्ट्वा शरणं जग्मुः प्रजाः सर्वा विभावसुं।प्रणिपत्याब्रुवंश्चैनमासीनं
विश्वरूपिणं।अग्ने मा त्वं प्रवर्द्धिष्ठाः कच्चिन्नो न दिधक्षसि।असौ हि राशिः सुमहान्समिद्धस्तव सर्प्पति ॥
अग्निरुवाच नैतदेवं यथा यूयं मन्यध्वमसुरार्द्दनाः।गरुडो बलवानेष मम तुल्यश्च तेजसा।जातः प
रमतेजस्वी विनतानंदिवर्द्धनः।तेजोराशिमिमं दृष्ट्वा युष्मान्मोहः समाविशत्।नागक्षयकरश्चैव काश्यपे
यो महाबलः।देवानां च हिते युक्तस्त्वहितो दैत्यरक्षसां।न भीः कार्या कथं चात्र पश्यध्वं सहिता मम।एवमुक्ता
स्तदा गत्वा गरुडं वाग्भिरस्तुवन्।ते दूरादभ्युपेत्यैनं देवाः सर्षिगणास्तदा देवा ऊचुः त्वमृषिस्त्वं महाभा
गस्त्वं देवः पतगेश्वरः।त्वं प्रभुस्तपनप्रख्यस्त्वं नस्त्राणमनुत्तमं॥बलोर्मिमान्साधुरदीनसत्वः समृद्धिमान्दु
र्विषहस्त्वमेव।त्वत्तः सृतं सर्वमहीनकीर्त्ते ह्यनागतं चोपगतं च सर्वं।त्वमुत्तमः सर्वमिदं चराचरं गभस्तिभि
र्भानुरिवावभाससे।समाक्षिपन्भानुमतः प्रभां मुहुस्त्वमंतकः सर्वमिदं ध्रुवाध्रुवं।दिवाकरः परिकुपितो

यथादहेत्प्रजास्तथादहसिकृताशनप्रभाभयंकरःप्रलयइवाग्निरुत्थितोविनाशयन्युगपरिवर्त्तनान्त
कृत।खगेश्वरंशरणमुपागतावयंमहौजसंज्वलनसमानवर्चसं।तडित्प्रभंवितिमिरमभ्रगोचरंमहाबलंग
रुडमुपेत्यखेचरं।परावरंवरदमजय्यविक्रमंतवौजसासर्वमिदंप्रतापितं।जगत्प्रभोतप्तसुवर्णवर्चसात्वं
पाहिसर्वांश्चसुरान्महात्मनः।भयान्वितानभसिविमानगामिनोविमानिताविपथगतिंप्रयांतिते।ऋषेःसु
तस्त्वमसिदयावतःप्रभोमहात्मनःखगवरकश्यपस्यह।समाक्रुधःकुरुजगतोदयांपरांत्वमीश्वरःप्रश
ममुपैहिपाहिनः।महाशनिस्फुरितसमस्वनेनतेदिशोंबरंत्रिदिवमियंचमेदिनी।चलंतिनःखगहृदयानिचा
निशंनिगृह्यतांवपुरिदमग्निसन्निभं।तवद्युतिंकुपितकृतांतसन्निभांनिशम्यनश्चलतिमनोव्यवस्थितं।
प्रसीदनःपतगपतेप्रयाचतांशिवश्चनोभवभगवन्सुखावहः॥एवंस्तुतःसुपर्णस्तुदेवैःसर्षिगणैस्तदा।
तेजसःप्रतिसंहारमात्मनस्सचकारह इत्यादिपर्वणिसौपर्णेसुपर्णस्तुतिः सौतिरुवाच ॥
सश्रुत्वाथात्मनोदेहंसुपर्णःप्रेक्ष्यचस्वयं।शरीरप्रतिसंहारमात्मनःसंप्रचक्रमे. सुपर्णउवाच ॥
नमेसर्वाणिभूतानिबिभियुर्देहदर्शनात्।भीमरूपात्समुद्विग्नास्तस्मात्तेजस्तुसंहरे सौतिरुवाच ॥

ततःकामगमःपक्षीकामवीर्योविहंगमः।अरुणंचात्मनःपृष्टमारोप्यसपितुर्गृहात्।मातुरंतिकमागच्छ
त्परंतीरंमहोदधेः।तत्रारुणश्चनिक्षिप्तोदिशंपूर्वांमहाद्युतिः।सूर्यस्तेजोभिरत्युग्रैर्लोकान्दग्धुमनायदा॥
रुरुरुवाच किमर्थंभगवान्सूर्योलोकान्दग्धुमनास्तदा।किमस्यापहृतंदेवैर्येनेमंमन्युराविशत्॥
प्रमतिरुवाच चंद्रादित्यौयदाराहुराख्यातोह्यमृतंपिबन्।वैरानुबंधंकृतवांश्चंद्रादित्येतदानघ।वध्य
मानेग्रहेणाथआदित्येमन्युराविशत्।सुरार्थायसमुत्पन्नोरोषोराहोस्तुमांप्रति।बह्वनर्थकरंपापमेकोहंस
मवाप्नुयां।सहायएवकार्येषुनचकृच्छ्रेषुदृश्यते।पश्यंतिग्रस्यमानंमांसहंतेवैदिवौकसः।तस्माल्लोकवि
नाशार्थंह्यवतिष्ठेनसंशयः।एवंकृतमतिःसूर्योह्यस्तमभ्यगमद्गिरिं।तस्माल्लोकविनाशायसंतापयतभा
स्करः।ततोदेवानुपागम्यप्रोचुरेनंमहर्षयः।अद्यार्द्धरात्रसमयेसर्वलोकभयावहः।उत्पत्स्यतेमहान्दाहस्त्रै
लोक्यस्यविनाशनः।ततोदेवाःसर्षिगणाउपगम्यपितामहं।अब्रुवन्किमिवेहाद्यमहद्दाहकृतंभयं।नतावद्दृ
श्यतेसूर्यःक्षयोयंप्रतिभातिच।उदितेभगवान्भानोकथमेतद्भविष्यति पितामहउवाच एषलोक
विनाशायरविसद्यंतुमुद्यतः।दृश्यन्नेवहिलोकान्सभस्मराशीकरिष्यति।तस्यप्रतिविधानंचविहितंपूर्वमे

वहि।कश्यपस्यसुतोधीमानरुणेत्यभिविश्रुतः।महाकायोमहातेजाःसस्थास्यतिपुरोरवेः।करिष्यतिचसा
रथ्यंतेजश्चास्यहरिष्यति।लोकानांस्वस्तिचैवंस्यादृषीणांचदिवौकसां प्रमतिरुवाच ततःपिताम
हाज्ञातःसर्वंचक्रेतदारुणः।उदितश्चैवसविताह्यरुणेनसमावृतः।एतत्तेसर्वमाख्यातंयत्सूर्यमनुराविशत्।
अरुणश्चयथैवास्यसारथ्यमकरोत्प्रभुः।भूयएवापरंप्रश्नंशृणुपूर्वमुदाहृतं इत्यादिपर्वणिसौप
र्णे सौतिरुवाच ततःकामगमःपक्षीमहावीर्योमहाबलः।मातुरंतिकमागच्छत्परंपारंमहोद
धेः।यत्रसाविनतातस्मिन्पणितेनपराजिता।अतीवदुःखसंतप्तादासीभावमुपागता।ततःकदाचिद्विनतां
प्रणतांपुत्रसन्निधौ।कालेचाहूयवचनंकद्रूरिदमभाषत।नागानामालयंभद्रेसुरम्यंचारुदर्शनं।समुद्र
कुक्षावेकांतेतत्रमांविनतेनय।ततःसुपर्णमातातामवहत्सर्पमातरं।पन्नगानारुडश्चापिमातुर्वचन
चोदितः।ससूर्यमभितोयातिवैनतेयोविहंगमः।सूर्यरश्मिप्रतप्ताश्चमूर्छितापन्नगाभवन्।तदवस्थान्
सुतान्दृष्ट्वाकद्रूःशक्रमथास्तुवत्।नमस्तेसर्वदेवेशनमस्तेवलसूदन।नमुचिघ्ननमस्तेस्तुसहस्राक्ष
शचीपते।सर्पाणांसूर्यतप्तानांवारिणात्वंप्लवोभव।त्वमेवपरमंत्राणमस्माकममरोत्तम।ईशोह्यसिपयः

स्त्वष्टुं त्वमनल्पंपुरंदर। त्वमेवमेघस्त्वंवायुस्त्वमग्निर्विद्युतोंबरे। त्वमभ्रगणविक्षेप्तात्वामेवाहुर्महाघनं। त्वंव
ज्रमतुलंघोरंघोषवांस्त्वंवलाहकः। स्रष्टात्वमेवलोकानांसंहर्त्ताचापराजितः। त्वंज्योतिःसर्वभूतानांत्वमादित्यो
विभावसुः। त्वंमहद्भूतमाश्चर्यंत्वंराजात्वंसुरोत्तमः। त्वंविष्णुस्त्वंसहस्राक्षस्त्वंदेवस्त्वंपरायणं। त्वंसर्वममृतंदेव
त्वंसोमःपरमार्चितः। त्वंमुहूर्त्तस्तिथिस्त्वंचत्वंलवस्त्वंपुनःक्षणः। शुक्लस्त्वंबहुलस्त्वंचकलाकाष्ठात्रुटिस्त
था। संवत्सरर्त्तवोमासारजन्यश्चदिनानिच। त्वमुत्तमासगिरिवनावसुंधरासभास्करंवितिमिरमंवरंतथा।
महोदधिःसतिमितिमिंगिलस्तथामहोर्मिमान्बहुमकरोझषाकुलः। महायशास्त्वमितिसदाभिपूज्यसेम
नीषिभिर्मुदितमनामहर्षिभिः। अभिष्टुतःपिवसिचसोममध्वरेवषट्कृतान्यपिचहवींषिभूतये। त्वंविप्रैः
सततमिहेज्यसेफलार्थंवेदांगेष्वतुलवलौघगीयसेच। त्वद्धेतोर्यजनपरायणाद्विजेंद्रावेदांगान्यभिगमयं
तिसर्वयत्नैः इत्यादिपर्वणिसौपर्णे सौतिरुवाच एवंस्तुतस्तदाकद्र्वाभगवान्हरिवाहनः
। नीलजीमूतसंघातैःसर्वमंवरमावृणोत्। तेमेघामुमुचुस्तोयंप्रभूतंविद्युदुज्ज्वलाः। परस्परमिवात्यर्थंगर्जं
तःसततंदिवि। संवर्त्तितमिवाकाशंजलदैःसुमहाद्भुतैः। सृजद्भिरतुलंतोयमजस्रंसुमहारवैः। संप्रनृत्तमिवा

काशंधारोर्मिभिरनेकशः।मेघस्तनितनिर्घोषैर्विद्युत्पवनकंपितैः।तैर्मेघैः सततासारंवर्षद्भिरनिशंतदा।नष्ट
चंद्रार्ककिरणमंबरंसमपद्यत।नागानामुत्तमोहर्षस्तथावर्षतिवासवे।आपूर्यतमहीचापिसलिलेनसमंत
तः।रसातलमनुप्राप्तंशीतलंविमलंजलं।तदाभूरभवच्छन्नाजलोर्मिभिरनेकशः।रामणीयकमागच्छन्मात्रा
सहभुजंगमाः इत्यादिपर्वणिसौपर्णे सौतिरुवाच संप्रहृष्टास्ततोनागाजलधाराप्लु
तास्तदा।सुपर्णेनोह्यमानास्तेजग्मुस्तंद्वीपमाशुवै।इंद्रतुल्यबलाघोरंददृशुस्सर्वमायतं।सुपर्णसहिताःस
र्पाः काननंचमनोरमं।सागरांबुपरिक्षिप्तंपक्षिसंघनिनादितं।विचित्रफलपुष्पाभिर्वनराजीभिरावृतं।भव
नैरावृतंरम्यैस्तथापद्माकरैरपि।प्रसन्नसलिलैश्चापिह्रदैर्दिव्यैर्विभूषितं।दिव्यगंधवहैःपुण्यैर्मारुतैरुप
वीजितं।उत्पतद्भिरिवाकाशंवृक्षैर्मलयजैरपि।शोभितंपुष्पवर्षाणिमुंचद्भिर्मारुतेरितैः।वायुविक्षिप्तकु
सुमैस्तथान्यैरपिपादपैः।किरद्भिरिवतत्रस्थान्नागान्पुष्पांबुवृष्टिभिः।मनःसंहर्षणंदिव्यंगंधर्वाप्सरसांप्रि
यं।मत्तभ्रमरसंघुष्टंमनोज्ञाकृतिदर्शनं।रमणीयंशिवंपुण्यंसर्वैर्जनमनोहरं।नानापक्षिरुतंरम्यंकद्रूपु
त्रप्रहर्षणं।तत्तेवनंसमासाद्यविजह्रुःपन्नगास्तदा।अब्रुवंश्चमहावीर्यंसुपर्णंपतगेश्वरं।वहास्मानपरंद्वीपं

सुरम्यं विमलोदकं। त्वं हि देशान्बहून्रम्यान्व्रजन्पश्यसि खेचर। स विचिंत्याब्रवीत्पक्षी मातरं विनतां तदा। किं
कारणं मया मातः कर्तव्यं सर्पभाषितं विनतोवाच दासीभूतास्मि दुर्योगान्सपत्न्याः पन्नगोत्तम।
पणं वितथमास्थाय सर्पैरुपधिना कृतं। तस्मिंस्तु कथिते मात्रा कारणे गगनेचरः। उवाच वचनं सर्पांस्तेन
दुःखेन दुःखितः। किमाहृत्य विदित्वा वा किं वा कृत्वेह पौरुषं। दास्याद्वो विप्रमुच्येयं तथ्यं वदत लेलिहाः ॥
सौतिरुवाच श्रुत्वा तमब्रुवन्सर्पा आहरामृतमोजसा। ततो दास्याद्विप्रमोक्षो भविता तव खेचर ॥
इत्यादिपर्वणि सौपर्णे सौतिरुवाच इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत्। गच्छाम्यमृतमाह
र्तुं भक्ष्यमिच्छामि वेदितुं विनतोवाच समुद्रकुक्षावेकांते निषादालयमुत्तमं। निषादानां सहस्राणि
तान्भुक्त्वामृतमानय। न च ते ब्राह्मणं हंतुं कार्या बुद्धिः कथंचन। अवध्यः सर्वभूतानां ब्राह्मणो ह्यनलोपमः।
अग्निरर्को विषं शस्त्रं विप्रो भवति कोपितः। एवमादिभिरूपैस्तु सतां वै ब्राह्मणो मतः। स ते तात न हंतव्यः संक्रुद्धेनापि
सर्वथा। ब्राह्मणानामभिद्रोहो न कर्तव्यः कथंचन। नैवमग्निर्नादित्यो भस्म कुर्यात्तथानघ। यथा कुर्यादभिक्रुद्धो
ब्राह्मणः शंसितव्रतः। तदेतैर्विविधैर्लिंगैस्त्वं विद्यास्तं द्विजोत्तमं। भूतानामग्रभूर्विप्रो वर्णश्रेष्ठः पिता गुरुः ॥

गरुडउवाच किंरूपोब्राह्मणोमातःकिंशीलःकिंपराक्रमः।किंस्विदग्निनिभोभातिकिंस्वित्सौम्यप्रदर्शनः।य
थाहमभिजानीयांब्राह्मणंलक्षणैःशुभैः।तन्मेकारणतोमातःपृच्छतोवक्तुमर्हसि विनतोवाच यस्तेकं
ठमनुप्राप्तोनिगीर्णंवडिशंयथा।दहेदंगारवत्पुत्रतंविद्याद्ब्राह्मणर्षभं।विप्रस्त्वयानहंतव्यःसंक्रुद्धेनापिसर्वदा
।प्रोवाचचैनंविनतापुत्रहार्द्दादिदंवचः।जठरेनचजीर्य्येद्यस्तंजानीहिद्विजोत्तमं।पुनःप्रोवाचविनतापुत्रहार्द्दादिदं
वचः।जानंत्यप्यतुलंवीर्यमाशीर्वादपरायणा।प्रीतापरमदुःखार्त्तानागैर्विप्रकृतासती।पक्षौतेमारुतःपातुचं
द्रसूर्य्यौचपृष्ठतः।शिरश्चपातुवह्निस्तेवसवस्सर्वतस्तनुं।अहंचतेसदापुत्रशांतिस्वस्तिपरायणा।इहासीनाभ
विष्यामिस्वस्तिकारेरतासदा।अरिष्टंव्रजपंथानंपुत्रकार्य्यार्थसिद्धये सौतिरुवाच ततःसमातुर्वचनं
निशम्यवितत्यपक्षौनभउत्पपात।ततोनिषादान्बलवानुपागतोबुभुक्षितःकालइवांतकोपरः।सतान्निषादानुप
संहरंस्तदारजःसमुद्धूयनभःस्पृशंमहत्।समुद्रकुक्षौचविशोषयन्पयःसमीपजान्भूधरजान्विचालयन्।ततःस
चक्रेमहद्दाननंतदानिषादमार्गंप्रतिरुध्यपक्षिराट्।ततोनिषादास्त्वरिताःप्रवव्रजुर्यतोमुखंतस्यभुजंगभोजि
नः।तदाननंविवृतमतिप्रमाणवत्समभ्ययुर्गगनमिवार्दिताःखगाः।सहस्रशःपवनरजोविमोहितायथानिल

आ॰प॰
५३

प्रचलितपादपेवने। ततःखगोवदनममित्रतापनःसमाहरत्परिचपलोमहाबलः। निषूदयन्बहुविधमत्स्यजी
विनोबुभुक्षितोगगनचरेश्वरस्तदा इत्यादिपर्वणिसौपर्णे सौतिरुवाच तस्यकंठमनुप्रा
प्तोब्राह्मणःसहभार्यया। दहन्दीप्तइवांगारस्तमुवाचांतरिक्षगः। द्विजोत्तमविनिर्गच्छतूर्णमास्यादपावृतात्।
नहिमेब्राह्मणोवध्यःपापेष्वपिरतःसदा। ब्रुवाणमेवंगरुडंब्राह्मणःप्रत्यभाषत। निषादीममभार्येयंनिर्गच्छ
तुमयासह॥ गरुडउवाच ॥एतामपिनिषादींत्वंपरिगृह्याशुनिःपत। तूर्णंसंभावयात्मानमजीर्णंमम
तेजसा सौतिरुवाच ततःसविप्रोनिष्क्रांतोनिषादीसहितस्तदा। वर्द्धयित्वाचगरुडमिष्टंदेशंजगा
मह। सहभार्येविनिष्क्रांतेतस्मिन्विप्रेचपक्षिराट्। वितत्यपक्षावाकाशमुत्पपातमनोजवः। ततोपश्यत्सपि
तरंपृष्टश्चाख्यातवान्पितुः। यथान्यायममेयात्मातंचोवाचमहानृषिः॥ कश्यपउ॰ ॥कच्चिद्वःकुशलं
नित्यंभोजनेबहुलंसुत। कच्चिच्चमानुषेलोकेतवान्नंविद्यतेबहु गरुडउ॰ मातामेकुशलाशश्वत्तथा
भ्रातातथाह्यहं। नहिमेकुशलंतातभोजनेबहुलेसदा। अहंहिसर्प्पैःप्रहितःसोममाहर्तुमुत्तमं। मातुर्दास्य
विमोक्षार्थमाहरिष्येतमद्यवै। मात्राचात्रसमादिष्टोनिषादान्भक्षयेतिह। नचमेतृप्तिरभवद्भक्षयित्वास

५३

हस्तन्नाः। तस्माद्भक्ष्यं त्वमपरं भगवन्प्रदिशस्व मे। यद्भुक्त्वामृतमाहर्त्तुं समर्थः स्यामहं प्रभो। क्षुत्पिपासा
विघातार्थं भक्ष्यमाख्यातु मे भवान्॥ कश्यप उ॰ इदं सरो महापुण्यं देवलोकेपि विश्रुतं। यत्र कूर्मो
गजं गृह्य हस्ती सदा कर्षत्यवाङ्मुखः। तयोर्जन्मांतरे वैरं संप्रवक्ष्याम्यशेषतः। तन्मे तत्वं निबोधस्व यत्प्रमा
णौ च तावुभौ। आसीद्विभावसुर्नाम महर्षिः कोपनो भृशं। भ्राता तस्यानुजश्चासीत्सुप्रतीको महातपाः। स ने
च्छति धनं भ्राता सहैकस्थं महामुनिः। विभागं कीर्त्तयत्येव सुप्रतीको हि नित्यशः। अथाब्रवीच्च तं भ्राता सुप्र
तीकं विभावसुः। विभागं बहवो मोहात्कर्त्तुमिच्छंति नित्यदाः। ततो विभक्तास्त्वन्योन्यं नाद्रियंतेऽर्थमोहिताः।
ततः स्वार्थपरान्मूढान्पृथग्भूतान्स्वकैर्धनैः। विदित्वा भेदयंत्येतानमित्रा मित्ररूपिणः। विदित्वा चापरे भिन्ना
नंतरेषु पतंत्यथ। भिन्नानामतुलो नाशः क्षिप्रमेव प्रवर्त्तते। तस्माद्विभागं भ्रातॄणां न प्रशंसंति साधवः। गुरु
शास्त्रे निबद्धानामन्योन्येनाभिशंकिनां। नियंतुं न हि शक्यस्त्वं भेदतो धनमिच्छसि। यस्मात्तस्मात्सुप्रतीक हस्ति
त्वं समवाप्स्यसि। शप्तस्त्वेवं सुप्रतीको विभावसुमथाब्रवीत्। त्वमप्यंतर्जलचरः कच्छपः संभविष्यसि। एवमन्यो
न्यशापात्तौ सुप्रतीकविभावसू। अस्मिन्सरसि विस्तीर्णे गजकूर्मौ बभूवतुः। इत्युक्त्वा गरुडं सोथ मांगल्यमक

रोत्नदा। युध्यतः सह देवैस्ते शुभं भवतु मंगलं। पूर्णकुंभा द्विजा गावो यच्चान्यत्किंचिदुत्तमं। शुभं स्वस्त्ययनं
चापि भविष्यति तिनवांऽज। युध्यमानस्य संग्रामे देवैः सार्द्धं महाबला। ऋचो यजूंषि सामानि पवित्राणि हवीं
षि चा रहस्यानि च सर्वाणि सर्वे वेदाश्च ते बलं। इत्युक्तो गरुडः पित्रा गतस्तं ह्रदमतिकांत। अपश्यन्निर्मलज
लं नानापक्षिसमाकुलं। गजकच्छपतौ प्राप्ताव थार्थ मूढचेतसौ। रोषदोषानुषंगेन तिर्यग्योनिगतावुभौ।
परस्परद्वेषरतौ ऽप्रमाणबलदर्पितौ। सरस्यस्मिन्महाकायौ पूर्ववैरानुसारिणौ। तयोरन्यतरः श्रीमान्समु
पैति महागजः। यस्य बृंहितशब्देन कूर्मोप्यंतर्जलेशयः। उत्थितो सौ महाकायः कृत्स्नं विक्षोभयन्सरः। यं दृष्ट्वा
वेष्टितकरः पतत्येष गजो जलं। दंतहस्ताग्रलांगूलपादवेगेन वीर्यवान्। विक्षोभयंस्ततो नागः सरो वकुंझष
कुलं। कूर्मोप्यभ्युद्यतशिरा युद्धायाभ्येति वीर्यवान्। षडुच्छ्रितो योजनानि गजस्तद्विगुणायतः। कूर्मस्त्रियो
जनोत्सेधो दशयोजनमंडलः। तावुभौ युद्धसंमत्तौ परस्परवधैषिणौ। उपयुज्याशु कर्मेदं साधयेद्धितमात्म
नः॥ सोतिरु ॥ स तत्स्मृत्वा पितुर्वाक्यं भीमवेगोंतरिक्षगः। नखेन गजमेकेन कूर्ममेकेन चाक्षिप
न्। समुत्पपात चाकाशं तत उच्चैर्विहंगमः। सोलंबं तीर्थमासाद्य देववृक्षानुपागमत्। ते भीताः समकंपे

ततस्तपक्षानिलाहताः। ननोभंज्यादितितदाद्विपाः कनकशाखिनः। प्रचलांगान्सतान्दृष्ट्वा मनोरथफलद्रु
मान्। अन्यानतुलरूपांगानुपचक्राम खेचरः। कांचनैराजतैश्चैव फलैर्वैडूर्यशाखिनः। सागरांबुपरिक्षिप्तान्
भ्राजमानान्महाद्रुमान्। तमुवाच खगश्रेष्ठं तत्र रोहिणपादपः। अतिप्रवृद्धः सुमहानापतंतं मनोजवं। यैषा
मम महाशाखा शतयोजनमायता। एतामास्थाय शाखां त्वं खादेमौ गजकच्छपौ॥ ततो द्रुमं पतगसहस्रसे
वितं महीधरप्रतिमवपुः प्रकंपयन्। खगोत्तमो द्रुतमभिपत्य वेगवान्बभंज तामविरलपत्रसंचयां ॥
इत्यादिपर्वणि सौपर्णे सौतिरुवाच स्पृष्टमात्रा तु पद्भ्यां सा गरुडेन बलीयसा। अभज्यत तरोः
शाखा भग्नां चैनामधारयत्। तां भक्त्वा स महाशाखां स्मयमानो विलोकयन्। अथात्र लंबतोपश्यद्वालखि
ल्यानधोमुखान्। ऋषयो ह्यत्र लंबंते न हन्यामिति तानृषीन्। तपोरतान्लंबमानान्ब्रह्मर्षीनभिवीक्ष्य सः। ह
न्यादेतान्संपतंती शाखेत्यथ विचिंत्य सः। नखैर्दृढतरं वीरः संगृह्य गजकच्छपौ। स तद्विनाशसंत्रासादभिप
त्य खगाधिपः। शाखामास्येन जग्राह तेषामेवान्ववेक्षया। अतिदैवं तु तत्तस्य कर्म दृष्ट्वा महर्षयः। विस्मयो
त्कंपहृदया नाम चक्रुर्महाखगे। गुरुं भारं समासाद्योड्डीन एष विहंगमः। गरुडस्तु खगश्रेष्ठस्तस्मात्पन्नग

भोजनः।ततःश्शनैःपर्यपतन्पक्षैःशैलान्प्रकंपयन्।एवंसोभ्यपतद्देशान्बहून्सगजकच्छपः।दयार्थंवाल
खिल्यानांनचस्थानमविंदत।सगत्वापर्वतश्रेष्ठंगंधमादनमंजसा।ददर्शकश्यपंतत्रपितरंतपसिस्थितं।
ददर्शतंपिताचापिदिव्यरूपंविहंगमं।तेजोवीर्यबलोपेतंमनोमारुतरंहसं।शैलशृंगप्रतीकाशंब्रह्मदंड
मिवोद्यतं।अचिंत्यमनभिध्येयंसर्वभूतभयंकरं।महावीर्यधरंरौद्रंसाक्षादग्निमिवोद्यतं।अप्रधृष्यमजेयं
चदेवदानवराक्षसैः।भेत्तारंगिरिशृंगाणांसमुद्रजलशोषणं।लोकसंलोडनंघोरंकृतांतसमदर्शनं।तमा
गतमभिप्रेक्ष्यभगवान्कश्यपस्तदा।विदित्वाचास्यसंकल्पमिदंवचनमब्रवीत् कश्यपउ पुत्रमासाह
संकार्षीर्मासद्योलप्स्यसेव्यथां।मात्वांदहेयुःसंक्रुद्धावालखिल्यामरीचिपाः।। सौतिरुवाच ततःप्रसाद
यामासकश्यपःपुत्रकारणात्।वालखिल्यान्महाभागांस्तपसाहतकल्मषान्।। कश्यपउवाच ।।प्रजा
हितार्थमारंभोगरुडस्यतपोधनाः।चिकीर्षतिमहत्कर्मतदनुज्ञातुमर्हथ सौतिरुवाच एवमुक्त्वा
भगवतामुनयस्तेसमभ्ययुः।मुक्त्वाशाखांगिरिंपुण्यंहिमवंतंतपोर्थिनः।ततस्तेष्वपयातेषुपितरंविनतासु
तः।शाखाव्याक्षिप्तवदनःपर्यपृच्छतकश्यपं।भगवन्क्वविमुंचामितरोःशाखामिमामहं।वर्जितंमानुषैर्दे

त्रामारब्धातुभगवान्ममातततोनिःपुरुषंशैलंहिमसंरुद्धकंदरं।अगमंमनसाप्यन्यैस्तस्याचख्यौसकश्य
पः।तंपर्वतंमहाकुक्षिमाविश्यसमहाखगः।जवेनाभ्यपतत्तार्क्ष्यःसशाखागजकच्छपः।नतांवध्रीपरिण
हेच्छतचर्मामहातनुः।शाखिनोमहतींशाखांयांप्रगृह्यययौखगः।सततःशतसाहस्रंयोजनांतरमाग
तः।कालेननातिमहतागरुडःपतगेश्वरः।सतंगत्वाक्षणेनैवपर्वतंवचनात्पितुः।अमुंचन्महतींशाखां
सस्वनंतत्रखेचरः।पक्षानिलहतश्चास्यप्राकंपतसशैलराट्।मुमोचपुष्पवर्षंचसमागलितपादपः।शृं
गाणिचव्यशीर्यंतगिरेस्तस्यसमंततः।मणिकांचनचित्राणिशोभयंतिमहागिरिं।शाखिनोबहवश्चापि
शाखयाभिहतास्तया।कांचनैःकुसुमैर्भांतिविद्युत्वंतइवांबुदाः।तेहेमविकचाभूमौयुताःपर्वतधातु
भिः।व्यराजंछाखिनस्तत्रसूर्यांशुप्रतिरंजिताः।ततस्तस्यगिरेःशृंगमास्थायसखगोत्तमः।भक्षयामास
गरुडस्तावुभौगजकच्छपौ।तावुभौभक्षयित्वातुसतार्क्ष्यःकूर्मकुंजरौ।ततःपर्वतकूटाग्रादुत्पपातमहा
जवः।प्रावर्त्तंताथदेवानामुत्पाताभयशंसिनः।इंद्रस्यवज्रंदयितंप्रजज्वालभयात्ततः।सधूमाच्यपत
त्सार्चिर्दिवोल्कानभसश्च्युताः।तथावसूनांरुद्राणामादित्यानांचसर्वशः।साध्यानांमरुतांचैवयेचान्येदे

आ०प०
५६

वतागणाः।स्वंस्वंप्रहरणंतेषांपरस्परमुपाद्रवत्।अभूतपूर्वंसंग्रामेतदादेवासुरेपिच।ववुर्वाताःसनि
र्घाताःपेतुरुल्काःसहस्रशः।निरभ्रमेवचाकाशंवज्रगर्जमहास्वनं।देवानामपियोदेवःसोप्यवर्षतशो
णितं।मम्लुर्माल्यानिदेवानांनेशुस्तेजांसिचैवहि।उत्पातमेघारौद्राश्चववृषुःशोणितंवहु।रजांसिमु
कुटान्येषामुत्थितानिव्यधर्षयन्।ततस्त्रासमसमुद्विग्नःसहदेवैःशतक्रतुः।उत्पातान्दारुणान्पश्यन्नि
त्युवाचवृहस्पतिं॥ इंद्रउवाच ॥किमर्थंभगवन्घोराउत्पाताःसहसोत्थिताः।नचशत्रुंप्रपश्या
मियुधियोनःप्रधर्षयेत् वृहस्पतिरु तवापराधाद्देवेंद्रप्रमादाच्चशतक्रतोः।तपसावालखि
ल्यानांमहर्षीणांमहात्मनां।कश्यपस्यमुनेःपुत्रोविनतायाश्चखेचरः।हर्तुंसोममभिप्राप्तोवलवान्
कामरूपधृक्।समर्थोवलिनांश्रेष्ठोहर्तुंसोमंविहंगमः।सर्वंसंभावयाम्यस्मिन्नसाध्यमपिसाधये
त्॥ सोतिरुवाच ॥श्रुत्वैतद्वचनंशक्रःप्रोवाचामृतरक्षिणः।महावीर्यवलःपक्षीहर्तुंसोममिहो
द्यतः।युष्मान्संवोधयाम्येषयथासनहरेद्वलात्।अतुलंहिवलंतस्यवृहस्पतिरुवाचमे।तच्छ्रुत्वावि
वुधावाक्यंविस्मितायत्नमास्थिताः।परिवार्यामृतंतस्थुर्वज्रीचेंद्रःप्रतापवान्।धारयंतोविचित्राणि

५६

कांचनानिमनस्विनः।कवचानिमहार्हाणिवैडूर्यविकृतानिच।वर्माण्यपिचगात्रेषुभानुमंतिदृढानिच।वि
विधानिचशस्त्राणिघोररूपाण्यनेकशः।सिततीक्ष्णाग्रधाराणिसमुद्यम्यसुरोत्तमाः।सविस्फुलिंगज्वा
लानिसधूमानिचसर्वशः।चक्राणिपरिघांश्चैवत्रिशूलानिपरश्वधान्।शक्तीश्चविविधास्तीक्ष्णाःकरवा
लांश्चनिर्मलान्।स्वदेहरूपाण्यादायगदाश्चोग्रदर्शनाः।तैःशस्त्रैर्भानुमद्भिस्तेदिव्याभरणभूषिताः।भा
नुमंतःसुरगणास्तस्थुर्विगतकल्मषाः।अनुपमबलवीर्यतेजसोधृतमनसःपरिरक्षणेऽमृतस्य।असुरपु
रविदारणाःसुराज्वलनसमिद्धवपुःप्रकाशिनश्चसर्वे।इतिसमरवरंसुराःस्थितास्तेपरिघसहस्रशतैः
समाकुलं।विगलितमिवचांबरांतरंतपनमरीचिविकाशितंबभासे इत्यादिपर्वणिसौपर्णे
शौनकउवाच कोपराधोमहेन्द्रस्यकःप्रमादश्चसूतज।तपसावालखिल्यानांसंभूतोगरुडःकथं।क
श्यपस्यद्विजातेश्चकथंवैपक्षिराट्सुतः।अधृष्यःसर्वभूतानामवध्यश्चाभवत्कथं।कथंचकामचारीस
कामवीर्यश्चखेचरः।एतदिच्छाम्यहंश्रोतुंपुराणेयदिपठ्यते॥ सौतिरुवाच ॥विषयोऽयंपुराणस्य
यन्मांत्वंपरिपृच्छसि।शृणुमेवदतःसर्वमेतत्संक्षेपतोद्विज।यजतःपुत्रकामस्यकश्यपस्यप्रजापतेः।साह

य्यमृषयोदेवागंधर्वाश्चददुः।किलातत्रेध्मानयनेशक्रोनियुक्तःकश्यपेनह।मुनयोवालखिल्याश्चयेचान्ये
देवतागणाः।शक्रस्तुवीर्यसदृशमिध्मभारंगिरिप्रभं।समुद्यम्यानयामासनातिकृछ्रादिवप्रभुः।अथाप
श्यदृषीन्ह्रस्वानंगुष्ठोदरवर्ष्मणः।पलाशवृंतिकामेकांवहतःसंहतान्पथि।प्रलीनान्स्वेष्विवांगेषुनिरा
हारांस्तपोधनान्।क्लिश्यमानान्मंदबलान्गोःपदेसंप्लुतोदके।तान्सर्वान्विस्मयाविष्टोवीर्योन्मत्तःपुरंदरः।
अवहस्याभ्यगाछीघ्रंलंघयित्वावमन्यच।तेथरोषसमाविष्टाःसुभृशंजातमन्यवः।आरेभिरेमहत्कर्मत
दाशक्रभयंकरं।जुहुवुस्तेसुतपसोविधिवज्जातवेदसं।मंत्रैरुच्चावचैर्विप्रायेनकामेनतछृणु।कामवीर्यः
कामगमोदेवराजभयप्रदः।इंद्रोन्यःसर्वदेवानांभवेदितियतव्रताः।इंद्राछतगुणःशौर्येवीर्येचैवमनोजवः।
तपसोःनःफलेनाद्यदारुणःसंभवत्विति।तद्बुध्वाभृशसंतप्तोदेवराजःशतक्रतुः।जगामशरणंतत्रकश्यपं
शंसितव्रतं।तछ्रुत्वादेवराजस्यकश्यपोथप्रजापतिः।वालखिल्यानुपागम्यकर्मसिद्धिमपृछत।एवमस्त्वि
तितंचापिप्रत्यूचुःसत्यवादिनः।तान्कश्यपउवाचेदंसांत्वपूर्वंप्रजापतिः।अयमिंद्रस्त्रिभुवनेनियोगाद्ब्रह्म
णःकृतः।इंद्रार्थेचभवंतोपियत्नवंतस्तपोधनाः।नमिथ्याब्रह्मणोवाक्यंकर्तुमर्हथसत्तमाः।भवतांहि

नमिथ्यायंसंकल्पोवैचिकीर्षितः।भवत्वेषपतत्रीणामिंद्रोतिवलसत्ववान्।प्रसादःक्रियतामस्यदेवरा
जस्ययाचतः।एवमुक्ताःकश्यपेनवालखिल्यास्तपोधनाः।प्रत्यूचुरभिसंपूज्यमुनिश्रेष्ठंप्रजापतिं ॥
वालखिल्याऊचुः इंद्रार्थोयंसमारंभःसर्वेषांनःप्रजापते।अपत्यार्थंसमारंभोभवतश्चायमीप्सितः
।तदिदंसफलंकर्मत्वयैवप्रतिगृह्यतां।तथाचैवंविधत्स्वात्रयथाश्रेयोनुपश्यसि।एतस्मिन्नेवकालेतुदेवी
दाक्षायिणीशुभा।विनतानामकल्याणीपुत्रकामायशस्विनी।तपस्तप्त्वाव्रतपरास्नातापुंसवनेशुचिः।
उपचक्रामभर्त्तारंतामुवाचाथकश्यपः।आरंभःसफलोदेविभवितायस्त्वयेप्सितः।जनयिष्यसिपुत्रौद्वौ
वीरौत्रिभुवनेश्वरौ।तपसावालखिल्यानांममसंकल्पजौतथा।भविष्यतोमहाभागौपुत्रौत्रैलोक्यपूजि
तौ।उवाचचैनांभगवान्कश्यपःपुनरेवह।धार्यतामप्रमादेनगर्भोयंसुमहोदयः।एतौसर्वपतत्रीणामिं
द्रत्वंकारयिष्यतः।लोकसंभावितौवीरौकामरूपौविहंगमौ।शतक्रतुमथोवाचप्रीयमाणःप्रजापतिः।त्व
त्सहायौमहावीर्यौभ्रातरौतेभविष्यतः।नैताभ्यांभवितादोषःसकाशात्तेपुरंदर।व्येतुतेशक्रसंतापस्त्व
मेवेंद्रोभविष्यसि।नचाप्येवंत्वयाभूयःक्षेप्तव्याब्रह्मवादिनः।नचावमान्यादर्पात्तेवाग्विषाभृशकोपनाः।

एवमुक्तोजगामेन्द्रोनिर्विशंकस्त्रिविष्टपं। विनताचापिसिद्धार्थाबभूवमुदितातथा। जनयामासपुत्रौद्वाव
रुणंगरुडंतथा। विकलांगोरुणस्तत्रभास्करस्यपुरःसरः। पतत्रीणांचगरुडइंद्रत्वेनाभ्यषिंच्यत। तस्यैत
त्कर्मसुमहच्छ्रूयतांभृगुनंदन इत्यादिपर्वणिसौपर्णे सौतिरुवाच ततस्तस्मिन्द्विजश्रेष्ठ
समुदायेतथाविधे। गरुडःपक्षिराट्तूर्णंसंप्राप्तोविबुधान्प्रति। तंदृष्ट्वातिबलंचैवप्राकंपंतसुरास्ततः।
परस्परंचप्रत्यघ्नन्सर्वप्रहरणान्युत। तत्रचासीदमेयात्माविद्युदग्निसमप्रभः। भौमनःसुमहावीर्यःसो
मस्यपरिरक्षिता। सतेनपतगेंद्रेणपक्षतुंडनखक्षतः। मुहूर्त्तमतुलंयुद्धंकृत्वाविनिहतोयुधि। रजश्चोद्धूयसुमह
त्पक्षवातेनखेचरः। कृत्वालोकान्निरालोकांस्तेनदेवानवाकिरत्। तेनावकीर्णारजसादेवामोहमुपागमन्। न
चैनंददृशुश्छन्नारजसामृतरक्षिणः। एवंसंलोडयामासगरुडस्त्रिदिवालयं। पक्षतुंडप्रहारैस्तुदेवान्सविददार

ह। ततोदेवःसहस्राक्षस्तूर्णंवायुमचोदयत्। विक्षिपेमांरजोवृष्टिंतवेदंकर्ममारुत। अथवायुरपोवाहत्तद्रज
स्तरसाबली। ततोवितिमिरेजातेदेवाःशकुनिमर्दयन्। ननादोच्चैःसबलवान्महामेघइवांबरे। वध्यमानःसुर
गणैःसर्वभूतानिभीषयन्। उत्पपातमहावीर्यःपक्षिराट्परवीरहा। समुत्पत्यांतरिक्षस्थंदेवानामुपरिस्थि

तंवर्मिणोविबुधाःसर्वेनानाशस्त्रैरवाकिरन्।पट्टिशैःपरिघैःशूलैर्गदाभिश्चसवासवाः।क्षुरांतैर्ज्वलितैश्चा
पिचक्रैरादित्यरूपिभिः।नानाशस्त्रविसर्गैस्तैर्वध्यमानःसमंततः।कुर्वन्सतुमुलंयुद्धंपक्षिराण्नव्यकंपत।निर्द
हन्निवचाकाशेवैनतेयःप्रतापवान्।पक्षाभ्यामुरसाचैवसमंताद्व्याक्षिपत्सुरान्।तेविक्षिप्तास्ततोदेवादुद्रुवुर्ग
रुडार्दिताः।नखतुंडक्षताश्चैवसुस्रुवुःशोणितंबहु।साध्याःप्राचींसगंधर्वावसवोदक्षिणांदिशं।प्रजग्मुःस
हितारुद्रैःपतगेंद्रप्रधर्षिताः।दिशंप्रतीचीमादित्यानासत्याउत्तरांदिशं।मुहुर्मुहुःप्रेक्षमाणायुध्यमानामह
हौजसः।अश्वक्रंदेनवीरेणरेणुकेनचपक्षिराट्।क्रथनेनचशूरेणतपनेनचखेचरः।उलूकश्वसनाभ्यांचनि
मिषेणचपक्षिराट्।प्ररुजेनचसंग्रामंचकारपुलिनेनच।तान्पक्षनखतुंडाग्रैरभिनद्विनतासुतः।युगांतकाले
संक्रुद्धःपिनाकीवपरंतपः।महाबलामहोत्साहास्तेनतेबहुधाक्षताः।रेजुरभ्रघनप्रख्यारुधिरौघप्रवर्षिणः।
तान्कृत्वापतगश्रेष्ठःसर्वानुत्क्रांतजीवितान्।अतिक्रांतोमृतस्यार्थेसर्वतोग्निमपश्यत।आवृण्वानंमहाज्वा
लमर्चिर्भिःसर्वतोंबरं।दहंतमिवतीक्ष्णांशुंचंडवायुसमीरितं।ततोनवत्यानवतीर्मुखानांकृत्वामहात्मागरु
डस्तरस्वी।नदीःसमापीयमुखैस्ततस्तैःसुशीघ्रमागम्यपुनर्जवेन।ज्वलंतमग्निंतममित्रतापनस्समास्तरत्

त्ररथोनदीभिः।ततःप्रचक्रेवपुरन्यदल्पंप्रवेष्टुकामोग्निमभिप्रशाम्य इत्यादिपर्वणिसौपर्णे
सौतिरुवाच जांबूनदमयोभूत्वामरीचिनिकरोज्वलः।प्रविवेशबलात्पक्षीवारिवेगइवार्णवं।सचक्रं
क्षुरपर्यंतमपश्यदमृतांतिके।परिभ्रमंतमनिशंतीक्ष्णधारमयस्मयं।ज्वलनार्कप्रभंघोरंछेदनंसोमहा
रिणां।घोररूपंतदत्यर्थंयंत्रंदेवैःसुनिर्मितं।तस्यांतरंसदृष्ट्वैवपर्यवर्त्ततखेचरः।आरांतरेणाभ्यपतत्संक्षि
प्यांगंक्षणेनह।अधश्चक्रस्यचैवात्रदीप्तानलसमद्युती।विद्युज्जिह्वौमहावीर्यौदीप्तास्यौदीप्तलोचनौ।चक्षु
र्विषौमहाघोरौनित्यंक्रुद्धौतरस्विनौ।रक्षार्थमेवामृतस्यददर्शभुजगोत्तमौ।सदासंरब्धनयनौसदाचानि
मिषेक्षणौ।तयोरेकोपियंपश्येत्सतूर्णंभस्मसाद्भवेत्।तयोश्चक्षूंषिरजसासुपर्णःसहसावृणोत्।ताभ्याम
दृष्टरूपोसौसर्वतःसमताडयत्।तयोरंगेसमाक्रम्यवैनतेयोंतरिक्षगः।आच्छिनत्तरसामध्येसोममभ्यद्रवत्ततः।
समुत्पाट्यामृतंतत्रवैनतेयस्ततोबली।उत्पपातजवेनैवयंत्रमुन्मथ्यवीर्यवान्।अपीत्वैवामृतंपक्षीपरिगृह्या
शुनिःसृतः।अगच्छदपरिश्रांतआवार्यार्कप्रभांततः।विष्णुनाचतदाकाशेवैनतेयःसमेयिवान्।तस्यनारायण
स्तुष्टस्तेनालोल्येनकर्मणा।तमुवाचाव्ययोदेवोवरदोस्मीतिखेचरं।सवव्रेतवतिष्ठेयमुपरीत्यंतरिक्षगः।उवाच

चैनंखगोपिनारायणमिदंवचः।अजरश्चामृतश्चस्याममृतेनविनाप्यहं।एवमस्त्वितितंविष्णुरुवाचविनतासुतं।
प्रतिगृह्यवरौतौचगरुडोविष्णुमब्रवीत।भवतेपिवरंदद्यांवृणोतुभगवानपि।तंवव्रेवाहनंविष्णुर्गरुत्मंतंमहावलं।
ध्वजंचचक्रेभगवानुपरिस्थास्यसीतितं।एवमस्त्वितितंदेवमुक्त्वानारायणंखगः।वव्राजतरसावेगाद्वायुंस्पर्द्धन्म
हाजवः।तंव्रजंतंखगश्रेष्ठंवज्रेणेंद्रोभ्यताडयत।हरंतममृतंरोषाद्गरुडंपक्षिणांवरं।तमुवाचेंद्रमाक्रंदेगरुडःप
ततांवरः।प्रहसन्श्लक्ष्णयावाचातथावज्रसमाहतः।ऋषेर्मानंकरिष्यामिवज्रंयस्यास्थिसंभवं।वज्रस्यचक
रिष्यामितवैवचशतक्रतौ।एतत्पत्रंत्यजाम्येकंयस्यांतंनोपलप्स्यसे।नचवज्रनिपातेनरुजामेस्तिकदाचन।एव
मुक्त्वाततःपत्रमुत्ससर्जसपक्षिराट्।तदुत्सृष्टमभिप्रेक्ष्यतस्यपर्णमनुत्तमं।हृष्टानिसर्वभूतानिनामचक्रुर्गरुत्म
तः।सुरूपंपत्रमालक्ष्यसुपर्णोयंभवत्विति।तद्दृष्ट्वामहदाश्चर्यंसहस्राक्षःपुरंदरः।खगोमहदिदंभूतमितिमत्वा
भ्यभाषत॥ शक्रउवाच ॥वलंविज्ञातुमिच्छामियत्तेपरमनुत्तमं।सख्यंचानंतमिच्छामित्वयासहखगोत्तम।
॥ इत्यादिपर्वणिसौपर्णे गरुडउवाच सख्यंमेस्तुतयादेवयथेच्छसिपुरंदर।वलंतुममजानीहि
महच्चासह्यमेवच।कामंनैतत्प्रशंसंतिसंतःस्ववलसंस्तवं।गुणसंकीर्तनंचापिस्वयमेवशतक्रतो।सखेतिकृ

त्वानुसख्ये पृष्टो वक्ष्याम्यहं त्वया। नह्यात्मस्तवसंयुक्तं वक्तव्यमनिमित्ततः। सपर्वतवनामुर्वीं ससागरजलामि
मां। पक्षनाड्यैकया शक्र त्वां चाप्यत्रावलंबितं। सर्वान्संपिंडितान्वापि लोकान्सस्थाणुजंगमान्। वहेयमपरि
श्रांतो विद्धीदं मे महद्बलं॥ सौतिरुवाच ॥ इत्युक्तवचनं वीरं किरीटी श्रीमतां वरः। आह शौनक देवेंद्रः स
र्वलोकहितः प्रभुः। एवमेव यथात्थ त्वं सर्वं संभाव्यते त्वयि। संगृह्यतामिदानीं मे सख्यमत्यंतमुत्तमं। न कार्यं य
दि सोमेन मम सोमः प्रदीयतां। अस्मांस्ते हि प्रबाधेयुर्येभ्यो दद्याद्भवानिमं॥ गरुड उवाच ॥ किंचित्का
रणमुद्दिश्य सोमोयं नीयते मया। न दास्यामि समादातुं सोमं कस्मैचिदप्यहं। यत्रेमं तु सहस्राक्ष निक्षिपेयमम
हं स्वयं। त्वमादाय ततस्तूर्णं हरेथास्त्रिदिवेश्वर॥ शक्र उवाच ॥ वाक्येनानेन तुष्टोहं यत्त्वयोक्तमिहांड
ज। यमिच्छसि वरं मत्तस्तं गृहाण खगोत्तम॥ सौतिरुवाच ॥ इत्युक्तः प्रत्युवाचेदं कद्रूपुत्राननुस्मरन्। स्मृ
त्वा चैवोपधिकृतं मातुर्दास्यनिमित्ततः। ईशोहमपि सर्वस्य करिष्यामि तु तेर्थितां। भवेयुर्भुजगाः शक्र मम भक्ष्याः
महाबलाः। तथेत्युक्त्वान्वगच्छत्तं ततो दानवसूदनः। देवदेवं महात्मानं योगिनामीश्वरं हरिं। स चान्वमोदत्तत्सर्वं
यथोक्तं गरुडेन वै। इदं भूयो वचः प्राह भगवांस्त्रिदशेश्वरः। हरिष्यामि विनिक्षिप्तं सोममित्यनुभाष्य तं। आजग

मततस्तूर्णं सुपर्णो मातुरंतिकं। अथ सर्पानुवाचेदं सर्वान्परमहृष्टवान्॥ इदमानीतममृतं निक्षेप्स्यामि कु
शेषु वः। स्नाता मंगलसंयुक्तास्ततः प्राश्नीत पन्नगाः। भवद्भिरिदमासीनैर्यदुक्तं तद्वचस्तदा। अदासी चै
व माते यमद्य प्रभृति चास्तु मे। यथोक्तं भवतामेतद्वचो मे प्रतिपादितं। ततः स्नातुं गताः सर्पाः प्रत्युक्त्वा तं त
थेत्युत। शक्रोप्यमृतमाक्षिप्य जगाम त्रिदिवं पुनः। अथागतास्तमुद्देशं सर्पाः सोमार्थिनस्तदा। स्नाताश्च
कृतजप्याश्च प्रहृष्टाः कृतमंगलाः। यत्रैतदमृतं चापि स्थापितं कुशसंस्तरे। तद्विज्ञाय हृतं सर्पाः प्रतिमा
याकृतं च तत्। सोमस्थानमिदं चेति दर्भांस्ते लिलिहुस्तदा। ततो द्विधाकृता जिह्वा सर्पाणां तेन कर्मणा।
अभवंश्चामृतस्पर्शाद्दर्भास्तेथ पवित्रिणः। एवं तदमृतं तेन हृतमाहृतमेव च। द्विजिह्वाश्च कृताः सर्पा गरु
डेन महात्मना। ततः सुपर्णः परमप्रहर्षवान्विहृत्य मात्रा सह तत्र कानने। भुजंगभक्षः परमार्चितः खगैरही
नकीर्त्तिर्विनतामनंदयत्। इमां कथां यः शृणुयान्नरः सदा पठेत वा द्विजगणमुख्यसंसदि। असंशयं त्रि
दिवमियात्सपुण्यभाङ्महात्मनः पतगपतेः प्रकीर्त्तनात्॥ इत्यादिपर्वण्यास्तीके सौपर्णे समाप्तम्
॥ शौनक उवाच ॥ भुजंगमानां शापस्य मात्रा चैव सुतेन च। विनतायास्त्वया प्रोक्तं कारणं सूतनंद

नावरश्रदानं भर्त्तीच कद्रूविनतयोस्तथा। नामनी चैव तत्प्रोक्ते पक्षिणो वैनतेययोः। पन्नगानां तु नामानि नकी
र्त्तयिष्ये तसूतज। प्राधान्येनापि नामानि श्रोतुमिच्छामहे वयं सौतिरुवाच बहुत्वान्नामधेयानि प
न्नगानां तपोधन। न कीर्त्तयिष्ये सर्वेषां प्राधान्येन तु मे शृणु। शेषः प्रथमतो जातो वासुकिस्तदनंतरं। ऐ
रावतस्तक्षकश्च कर्कोटकधनंजयौ। कालीयो मणिनागश्च नागश्चापूरणस्तथा। नागस्तथा पिंजरक एल
लापत्रोथ वामनः। नीलानीलौ तथा नागो कल्माषशबलौ तथा। आर्यकश्चोग्रकश्चैव नागः कलशपोत
कः। सुनामुखो दधिमुखस्तथा विमलपिंडकः। ~~कंबलाश्वतरौ चापि~~ आप्तः करोटकश्चैव शंखो वालिशि
खस्तथा। निष्टानको हेमगुहो नहुषः पिंगलस्तथा। बाह्यकर्णो हस्तिपदस्तथा मुद्गरपिंडकः। कंबलाश्वतरौ
चापि नागः कालीयकस्तथा। वृत्तसंवर्त्तकौ नागौ द्वौ च पद्माविति श्रुतौ। नागः शंखमुखश्चैव तथा कूष्मांडको
परः। क्षेमकश्च तथा नागो नागः पिंडारकस्तथा। करवीरः पुष्पदंष्ट्रो बिल्वको बिल्वपांडुरः। मूषकादः शंखशि
राः पूर्णभद्रो हरिद्रकः। अपराजितो ज्योतिकश्च पन्नगः श्रीवहस्तथा। कौरव्यो धृतराष्ट्रश्च शंखपिंड
श्च वीर्यवान्। विरजाश्च सुबाहुश्च शालिपिंडश्च वीर्यवान्। हस्तिकर्णः पिठरकः सुमुखः कोणपाशनः। कुव

रः कुंजरश्चैव तथा नागः प्रभाकरः। कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा। कर्दमश्च महानागो नागश्च ब-
हुमूलकः। कर्कराकर्करौ नागौ कुंडोदरमहोदरौ। एते प्राधान्यतो नागाः कीर्तिता द्विजसत्तम। बहुत्वान्नाम-
धेयानामितरे नानुकीर्तिताः। एतेषां प्रसवो यश्च प्रसवस्य च संततिः। असंख्येयेति मत्वा तान्न ब्रवीमि तपोध-
न। बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च। अशक्यान्येव संख्यातुं पन्नगानां तपोधन   इत्यादिपर्वण्या-
स्तीके   शौनक उवाच   आख्याता भुजगास्तात वीर्यवंतो दुरासदाः। शापं तं तेऽभिविज्ञाय कृतवंतः किमुत्त-
रं   सूत उवाच   तेषां तु भगवांछेषः कद्रूसुतो महायशाः। उग्रं तपः समातस्थे वायुभक्षो यतव्रतः। गंध-
मादनमासाद्य बदर्यां च तपोरतः। गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे। तेषु तेषु च पुण्येषु तीर्थेष्वायतने-
षु च। एकांतशीलो नियतः सततं विजितेंद्रियः। तप्यमानं तपो घोरं तं ददर्श पितामहः। संशुष्कमांसत्वक्स्नायुं ज-
टाचीरधरं मुनिं। तमब्रवीत्सत्यधृतिं तप्यमानं पितामहः। किमिदं कुरुषे शेष प्रजानां स्वस्ति वै कुरु। त्वं हि तीव्रेण
तपसा प्रजास्तापयसेऽनघ। ब्रूहि कामं च मे शेष यस्ते हृदि व्यवस्थितः   शेष उवाच   सोदर्या मम सर्वे हि
भ्रातरो मंदचेतसः। सह तैर्नोत्सहे वस्तुं तद्भवाननुमन्यतां। अभ्यसूयंति सततं परस्परममित्रवत्। ततोऽहं तप आति

ष्टुंनैतान्यहंपेयमित्युत।नमर्षयंतिसस्युतोसततंविनतांचते।अस्माकंचापरोभ्रातावैनतेयोन्तरिक्षगः।तंच
द्विषंतिसततंसचापिवलवत्तरः।वरप्रदानात्सपितुःकश्यपस्यमहात्मनः।सोहंतपःसमास्थायमोक्षा
मीदंकलेवरं।कथंमेप्रेत्यभावेपिनतैःस्यात्सहसंगमः।तमेवंवादिनंशेषंपितामहउवाचह ब्रह्मोवा
च जानामिशेषसर्वेषांभ्रातॄणांतेविचेष्टितं।मातुश्चाप्यपराधाद्वैभ्रातॄणांतेमहद्भयं।कृतोत्रपरिहा
रश्चपूर्वमेवभुजंगम।भ्रातॄणांतवसर्वेषांनशोकंकर्तुमर्हसि।वृणीष्वचवरंमत्तःशेषयत्तेभिकांक्षितं।
दास्यामिहिवरंतेद्यप्रीतिर्मेपरमात्वयि।दिष्ट्याबुद्धिश्चतेधर्मेनिविष्टापन्नगोत्तम।भूयोभूयश्चतेबुद्धि
र्धर्मेभवतुसुस्थिरा॥ शेषउवाच ॥एषएववरोदेवकांक्षितोमेपितामह।धर्मेमेरमतांबुद्धिःशमे
तपसिचेश्वर ब्रह्मोवाच प्रीतोस्म्यनेनतेशेषदमेनचशमेनच।त्वयात्विदंवचःकार्यमन्नियो
गात्प्रजाहितं॥इमांमहींशैलवनोपपन्नांससागरग्रामविहारपत्तनां।त्वंशेषसम्यक्चलितांयथावत्सं
गृह्यतिष्ठस्वयथाचलास्यात् शेषउवाच यथाहदेवोवरदःप्रजापतिर्महीपतिर्भूतपतिर्जगत्पतिः।
तथामहींधारयितास्मिनिश्चलांप्रयच्छतांमेशिरसिप्रजापते ब्रह्मोवाच अधोमहींगच्छभुजंग

छभुजंगमोत्तमस्त्वयंतवैषाविवरंप्रदास्यति।इमांधरांधारयताल्वयाहिमेमहत्प्रियंशेषकृतंभविष्य
ति सौतिरुवाच तथेतिकृत्वाविवरंप्रविश्यसःप्रभुर्भुवोभुजगवराग्रजःस्थितः।बिभर्तिदेवी
शिरसामहीमिमांसमुद्रनेमिंपरिगृह्यसर्वतः ब्रह्मोवाच शेषोसिनागोत्तमधर्मदेवोमहीमि
मांधारयसेतदेकः।अनंतभोगैःपरिगृह्यसर्वंयथाहमेवंवलभिद्यथावा सौतिरुवाच अंत
र्भूमौवसन्नेवंनागोनंतःप्रतापवान्।धारयन्वसुधामेकःशासनाद्ब्रह्मणोविभुः।सुपर्णंचसहायंवैभग
वानमरोत्तमः।प्रादादनंतायतदावैनतेयंपितामहः इत्यादिपर्वण्यास्तीके सौतिरु
मातुःसकाशात्तंशापंश्रुत्वावैपन्नगोत्तमः।वासुकिश्चिंतयामासशापोयंनभवेत्कथं।ततःसमंत्रयामा
सभ्रातृभिसह सर्वशः।ऐरावतप्रभृतिभिःसर्वैर्धर्मपरायणैः॥ वासुकिरु ॥अयंशापोयथोद्दिष्टो
विदितंवस्तथानघाः।तस्यशापस्यमोक्षार्थंमंत्रयित्वायतामहे।सर्वेषामेवशापानांप्रतिघातोहिविद्यते।न
तुमात्राभिशप्तानांमोक्षःक्वचनविद्यते।अव्ययस्याप्रमेयस्यसत्यस्यचतथाग्रतः।शप्ताइत्येवमेश्रुत्वाजायते
हृदिवेपथुः।नूनंसर्वविनाशोयमस्माकंसमुपागतः।नह्येतांसोव्ययोदेवःशपंतीप्रत्यषेधयत्।तस्मात्संम

त्रयामोघ्रभुजंगानामनामयं।यथाभवेद्धिसर्वेषामानःकालोत्ययगादयं।सर्वएवहिनस्तावद्बुद्धिमंतोविचक्ष
णाः।अपिमंत्रयमाणाहिहेतुंपश्याममोक्षणे।यथानष्टंपुरादेवागृहमग्निंगुहागतं।यथासयज्ञोनभवेद्य
थावापिपराभवः।जनमेजयस्यसर्प्पाणांविनाशकरणायवै॥ सौतिरुवाच ॥तथेत्युक्त्वाततः
सर्वेकाद्रवेयाःसमागताः।समयंचक्रिरेतत्रमंत्रबुद्धिविशारदाः।एकेतत्राब्रुवन्नागावयंभूत्वाद्विजर्ष
भाः।जनमेजयंतुभिक्षामोयज्ञस्तेनभवेदिति।अपरेत्वब्रुवन्नागास्तत्रपंडितमानिनः।मंत्रिणोस्यवयं
सर्वेभविष्यामःसुसंमताः।सनःप्रक्ष्यतिसर्वेषुकार्येष्वर्थविनिश्चयं।तत्रबुद्धिंप्रदास्यामोयथायज्ञोनि
वर्त्स्यसि।सनोवकुमताराजाबुध्वाबुद्धिमतांवरः।यज्ञार्थंप्रक्ष्यतिव्यक्तंनेतिवक्ष्यामहेवयं।दर्शयंतोवहू
न्दोषान्प्रेत्यचेहचदारुणान्।हेतुभिःकारणैश्चैवयथायज्ञोभवेन्नसः।अथवायउपाध्यायःक्रतौतस्यभ
विष्यति।सर्पसत्रविधानज्ञोराजकार्यहितेरतः।तंगत्वादशतांकश्चिद्भुजगःसमरिष्यति।तस्मिन्मृते
यज्ञकारेक्रतुःसनभविष्यति।येचान्येसर्पसत्रज्ञाभविष्यंत्यस्यतर्त्विजः।तांश्चसर्वान्दशिष्यामःकृतमे
वंभविष्यति।अपरेत्वब्रुवन्नागाधर्म्मात्मानोदयालवः।अबुद्धिरेषाभवतांब्रह्महत्यानशोभना।स

म्यकस्य धर्म्ममूलो वै व्यसने शांतिरुत्तमा। अधर्मोत्तरता नाम कृत्स्नं व्यापादयेज्जगत्। अपरे त्वब्रुवन्नागाः स
मिद्धं जातवेदसं। वर्षैर्निर्वापयिष्यामो मेघाभूत्वा सविद्युतः। स्रुग्भांडं निशि गत्वा च अपरे भुजगोत्तमाः। प्रम
त्तानां हरंत्वाशु विघ्न एवं भविष्यति। यज्ञे वा भुजगास्तस्मिन्नूशतशोथ सहस्रशः। जनान्दशंतु वै सर्वानेवं त्रा
सो भविष्यति। अथवा संस्कृतं भोज्यं दूषयंतु भुजंगमाः। स्वेन मूत्रपुरीषेण सर्वभोज्यविनाशिना। अपरे त्व
ब्रुवंस्तत्र ऋत्विजोस्य भवामहे। यज्ञविघ्नं करिष्यामो दीयतां दक्षिणा इति। वश्यतां च गतोऽसौ नः करिष्यति
यथेप्सितं। अपरे त्वब्रुवंस्तत्र जले प्रक्रीडितं नृपं। गृह्यमानीय बध्नीमः क्रतुरेवं भवेत्र सः। अपरे त्वब्रुवंस्तत्र
नागाः पंडितमानिनः। दशामस्तं प्रगृह्याशु कृतमेवं भविष्यति। छिन्नं मूलमनर्थानां मृते तस्मिन्भविष्य
ति। एषा नो नैष्ठिकी बुद्धिः सर्वेषामीक्षण श्रवः। अथ यन्मन्यसे राजन्द्रुतं तत्संविधीयतां। इत्युक्त्वा समुदी
क्षंत वासुकिं पन्नगोत्तमं। वासुकिश्चापि संचिंत्य तानुवाच भुजंगमान्। नैषा वो नैष्ठिकी बुद्धिर्मता कर्तुं भु
जंगमाः। सर्वेषामेव मे बुद्धिः पन्नगानां न रोचते। किं तत्र संविधातव्यं भवतां स्याद्धितं तु यत्। श्रेयः प्रसादं नम
न्ये कश्यप पश्य महात्मनः। ज्ञातिवर्गस्य सौहार्द्दादात्मनश्च भुजंगमाः। न च जानाति मे बुद्धिः किंचित्कर्तुं व

चोदितं च मया हीदं विधातव्यं भवतां यद्धितं भवेत्। अनेनाहं भृशं तप्ये गुणदोषौ मदाश्रयौ   इत्यादि
पर्वण्यास्तीके   सौतिरुवाच   सर्पाणां तु वचः श्रुत्वा सर्वेषामिति चेति च। वासुकेश्च वचः श्रु
त्वा एलापत्रोब्रवीदिदं। न स यज्ञो न भविता स च राजा तथाविधः। जनमेजयः पांडवेयो यतोस्माकं महद्भ
यं। दैवेनोपहतो राजन् यो भवेदिह पूरुषः। स दैवमेवाश्रयते नान्यस्तत्र परायणं। तदिदं दैवमस्माकं भ
यं पन्नगसत्तमाः। दैवमेवाश्रयामोत्र शृणुध्वं च वचो मम। अहं शापे समुत्सृष्टे समश्रौषं वचस्तदा। मा
तुरुत्संगमारूढो भयात्पन्नगसत्तमाः। देवानां पन्नगश्रेष्ठास्तीक्ष्णास्तीक्ष्णा इति प्रभो। पितामहमुपागम्य
दुःखार्त्तानां महाद्युते॥   देवा ऊचुः   ॥ का हि लब्ध्वा प्रियान्पुत्रान् शपेदेवं पितामह। ऋते कद्रूं तीक्ष्णरू
पां देवदेव तवाग्रतः। तथेति च वचस्तस्यास्त्वयाप्युक्तं पितामह। एतदिच्छाम विज्ञातुं कारणं यन्न वारिता
ब्रह्मोवाच   बहवः पन्नगास्तीक्ष्णा घोररूपा विषोल्बणाः। यन्निमित्तश्च भविता प्रजानां हितकामोहं न च वा
रितवांस्तदा। ये दंदशूकाः क्षुद्राश्च पापाचारा विषोल्बणाः। तेषां विनाशो भविता न तु ये धर्मचारिणः। यन्निमि
त्तश्च भविता मोक्षस्तेषां महाभयात्। पन्नगानां निबोधध्वं तस्मिन्काले समागते। यायावरकुले धीमान्भ

विष्यतिमहानृषिः।जरत्कारुरितिख्यातस्तपस्वीनियतेंद्रियः।तस्यपुत्रोजरत्कारोर्भविष्यतितपोधनः।
आस्तीकोनामयज्ञंसप्रतिषेत्स्यतितंतदा।तत्रमोक्ष्यंतिभुजगायेभविष्यंतिधार्मिकाः देवाऊचुः ॥
समुनिप्रवरोब्रह्मन्जरत्कारुर्महातपाः।कस्यांपुत्रंमहात्मानंजनयिष्यतिवीर्यवान् ब्रह्मोवाच स
मायांसनामासकन्यायांद्विजसत्तमः।अपत्यंवीर्यसंपन्नंवीर्यवान्जनयिष्यति।वासुकेःसर्पराजस्यजरत्का
रुःस्वसाकिल।सतस्यांभवितापुत्रःशापान्नागांश्चमोक्ष्यति एलापत्रउ एवमस्त्वितितंदेवाःपिताम
हमथाब्रुवन्।उक्त्वैवंवचनंदेवान्विरिंचिस्त्रिदिवंययौ।सोहमेवंप्रपश्यामिवासुकेभगिनींतव।जरत्कारु
रितिख्यातांतांतस्मैप्रतिपादय।भैक्षवद्भिक्षमाणायनागानांभयशांतये।ऋषयेसुव्रतायैनामेषमोक्षः
श्रुतोमया॥ इत्यादिपर्वण्यास्तीके - सौतिरुवाच एलापत्रवचःश्रुत्वातेनागाद्विजसत्तम।
सर्वेप्रहृष्टमनसःसाधुसाध्वित्यपूजयन्।ततःप्रभृतितांकन्यांवासुकिःपर्यरक्षत।जरत्कारुंस्वसारंवैपरं
हर्षमवापच।ततोनातिमहाकालःसमतीतइवाभवत्।अथदेवासुराःसर्वेममंथुर्वरुणालयं।तत्रनेत्र
मभून्नागोवासुकिर्बलिनांवरः।समाप्यैवचतत्कर्मपितामहमुपागमत्।देवावासुकिनासार्द्धंपितामह

आ०प०
६५

मथाब्रुवन्। भगवंछापभीतोयंवासुकिस्तप्यतेभृशं। अस्यैतन्मानसंशल्यंसमुद्धर्तुंत्वमर्हसि। जनन्याःशाप
जंदेवज्ञातीनांहितमिछतः। हितोह्ययंसदास्माकंप्रियंकारीचनागराट्। प्रसादंकुरुदेवेशशमयास्यमनो
ज्वरं   ब्रह्मोवाच   मयैवैतद्वितीर्णंवैवचनंमनसामराः। एलापत्रेणनागेनयदस्याभिहितंपुरा। त
त्करोत्वेषनागेंद्रःप्राप्तकालंवचःस्वयं। विनशिष्यंतियेपापानतुयेधर्मचारिणः। उत्पन्नःसजरत्कारुस्त
पस्युग्रेरतोद्विजः। तस्यैषभगिनीकालेजरत्कारुःप्रयछतु। एलापत्रेणयत्प्रोक्तंवचनंभुजगेनह। पन्न
गानांहितंदेवास्तत्तथानतदन्यथा   सौतिरुवाच   एतछ्रुत्वातुनागेंद्रःपितामहवचस्तदा। संदि
श्यपन्नगान्सर्वान्वासुकिःशापमोहितः। स्वसारमुद्यम्यतदाजरत्कारुमृषिंप्रति। सर्पान्बहून्जरत्कारौनित्य
युक्तान्समादधत्। जरत्कारुर्यदाभार्यामिछेद्वरयितुंप्रभुः। शीघ्रमेत्यतदाख्येयंतन्नःश्रेयोभविष्यति
इत्यादिपर्वण्यास्तीके   शौनकउ   जरत्कारुरितिख्यातोयस्त्वयासूतनंदन। इछामितदहंश्रोतुं
ऋषेस्तस्यमहात्मनः। किंकारणंजरत्कारोर्नामैतत्प्रथितंभुवि। जरत्कारुनिरुक्तिंत्वंयथावद्वक्तुमर्हसि॥
तत्रस्यवचनंश्रुत्वाप्रोवाचसमहाद्युतिः॥   सौतिरुवाच   ॥जरेतिक्षयमाहुर्वैदारुणंकारुसंज्ञि

६५

तांनारीरंकारुतस्यासीतत्सधीमांछुभैःगुणैः।ख्यापयामासतीव्रेणतपसेत्यतउच्यते।जरत्कारुरितिब्रूल
न्नृवासुकेर्भगिनीतथा।एवमुक्तस्तुधर्मात्माशौनकःप्राहसत्तदा।उग्रश्रवसमामंत्र्यउपपन्नमितिब्रुवन्॥

॥ शौनक उ ॥ उक्तंनामयथापूर्वंसर्वंतच्छ्रुतवानहं।तथातुजातोह्यास्तीकएतदिच्छामिवेदितुं।तच्छ्रुत्वा
वचनंतस्यसूतःप्रोवाचशास्त्रतः॥

॥ सौतिरुवाच ॥ संदिश्यपन्नगान्सर्वान्वासुकिःसुसमाहितः।स्वसा
रमुद्यम्यतदाजरत्कारुमृषिंप्रति।अथकालस्यमहतःसमुनिःशंसितव्रतः।तपस्यभिरतोधीमान्सदा
रान्नाभ्यकांक्षत।सतूर्ध्वरेतास्तपसिप्रसक्तःस्वाध्यायवान्वीतभयःकृतात्मा।चचारसर्वांपृथिवींमहा
त्मानचापिदारान्मनसाप्यकांक्षत्।ततोऽपरस्मिन्संप्राप्तेकालेकस्मिंश्चिदेवतु।परीक्षिन्नामराजासीद्ब्र
ह्मन्कौरववंशजः।यथापांडुर्महाबाहुर्धनुर्धरवरोयुधि।बभूवमृगयाशीलःपुरास्यप्रपितामहः।मृगा
न्विध्यन्वराहांश्चतरक्षून्महिषांस्तथा।अन्यांश्चविविधान्वन्यांश्चचारपृथिवीपतिः।सकदाचिन्मृगंविद्ध्वा
बाणेनानतपर्वणा।पृष्ठतोधनुरादायससारगहनेवने।यथैवभगवान्रुद्रोविद्ध्वायज्ञमृगंदिवि।अन्व
गच्छद्धनुःपाणिःपर्यन्वेषंस्ततस्ततः।नहितेनमृगोविद्धोजीवन्गच्छतिवैवने।पूर्वरूपंतुतत्तूर्णमासीत्स्वर्ग

आ० प०
६६

गतिं व्रति। परीक्षितो नरेंद्रस्य विद्धो यन्नष्टवान्मृगः। दूरं चापहृतस्तेन मृगेण स महीपतिः। परिश्रांतः पिपा
सार्त्तः आससाद मुनिं वने। गवां प्रचारे घासीनं वत्सानां मुखनिःसृतं। भूयिष्ठमुपयुंजानं फेनमापिबतां प
यः। तमभिद्रुत्य वेगेन स राजा शंसितव्रतं। अपृच्छद्धनुरुद्यम्य तं मुनिं क्षुच्छ्रमान्वितः। भो भो ब्रह्मन्नहं राजा
परीक्षिदभिमन्युजः। मया विद्धो मृगो नष्टः कच्चित्तं दृष्टवानसि। स मुनिस्तं तु नोवाच किंचिन्मौनव्रते स्थितः।
तस्य स्कंधे मृतं सर्पं क्रुद्धो राजा समासजत्। समुत्क्षिप्य धनुष्कोट्या स चैनं समुपैक्षत। न स किंचिदुवाचैनं शु
भं वा यदि वाशुभं। स राजा क्रोधमुत्सृज्य व्यथितस्तं तथागतं। दृष्ट्वा जगाम नगरमृषिस्त्वासीत्तथैव सः।
न हि तं राजशार्दूलं क्षमाशीलो महामुनिः। स्वधर्मनिरतं भूपं समाक्षिप्तोप्यधर्षयत्। न हि तं राजशार्दूलस्त
था धर्मपरायणः। जानाति भरतश्रेष्ठस्तत एनमधर्षयत्। तरुणस्तस्य पुत्रोभूत्तिग्मतेजा महातपाः। शृं
गी नाम महाक्रोधो दुःप्रसादो महाव्रतः। स देवं परमासीनं सर्वभूतहिते रतं। ब्रह्माणमुपतस्थे वै काले
काले सुसंयतः। स तेन समनुज्ञातो ब्रह्मणा गृहमेयिवान्। सख्योक्तः क्रीडमानेन स तत्र हसता किल। संरंभा
त्कोपनोतीव विषकल्पो मुनेः सुतः। उद्दिश्य पितरं तस्य यः श्रुत्वा रोषमाहरत्। ऋषिपुत्रेण नर्मार्थं कृश

६६

नद्विजसत्तम॥ कृशउवाच ॥तेजस्विनस्तवपितातथैवचतपस्विनः॥शवंस्कंधेनवहतिमाशृंगिन्
गर्वितोभव॥माहस्मऋषिपुत्रेषुमास्मकिंचिद्वचोवद॥अस्मद्विधेषुसिद्धेषुब्रह्मवित्सुतपस्विषु॥क्वतेपु
रुषमानित्वंक्वतेवाचस्तथाविधाः॥दर्पजाःपितरंद्रष्टायस्त्वंशवधरंतथा॥पित्राचतवतत्कर्मनानुरूपमि
वात्मनः॥कृतंमुनिजनश्रेष्ठयेनाहंभृशदुःखितः इत्यादिपर्वण्यास्तीके सौतिरुवाच
एवमुक्तःसतेजस्वीशृंगीकोपसमन्वितः॥मृतधारंगुरुंश्रुत्वापर्यतप्यतमन्युना॥सतंकृशमभिप्रेक्ष्यसू
नृतांवाचमुत्सृजन्॥अपृच्छत्तंकथंतातःसमेऽद्यमृतधारकः॥ कृशउवाच ॥राज्ञापरिक्षितातात
मृगयांपरिधावता॥अवसक्तःपितुस्तेऽद्यमृतःस्कंधेभुजंगमः शृंग्युवाच किंमेपित्राकृतंतस्यरा
ज्ञोनिष्टदुरात्मनः॥ब्रूहितत्कृशतत्त्वेनपश्यमेतपसोबलं कृशउवाच सराजामृगयांयातःप
रिक्षिदभिमन्युजः॥ससारमृगमेकाकीविध्वाबाणेनशीघ्रगं॥नचापश्यन्मृगंराजाचरंस्तस्मिन्महावने॥
पितरंतेसदृष्ट्वैवपप्रच्छानभिभाषिणं॥तंस्थाणुभूतंतिष्ठंतंक्षुत्पिपासाश्रमातुरः॥पुनःपुनर्मृगंनष्टंप
प्रच्छपितरंतव॥सचमौनव्रतोपेतोनैवतंप्रत्यभाषत॥तस्यराजाधनुष्कोट्यासर्पंस्कंधेसमासृजत्॥शृंगिंस्त

वपितासोऽपितथैवास्तेयतव्रतः।सोपिराजास्वनगरंप्रस्थितोगजसाह्वयं॥ सौतिरुवाच ॥श्रुत्वैवमृषि
पुत्रस्तुशवंस्कंधेप्रतिष्ठितं।कोपसंरक्तनयनःप्रज्वलन्निवमन्युना।आविष्टःसहिकोपेनशशापनृपतिंत
दा।वार्युपस्पृश्यतेजस्वीक्रोधवेगबलात्कृतः॥ शृंग्युवाच ॥योसौवृद्धस्यतातस्यतथाकृच्छ्रगतस्य
च।स्कंधेमृतंसमास्राक्षीत्पन्नगंराजकिल्बिषी।तंपापमतिसंक्रुद्धस्तक्षकःपन्नगेश्वरः।आशीविषस्तिग्मते
जामद्वाक्यबलचोदितः।सप्तरात्रादितोनेतायमस्यसदनंप्रति।द्विजानामवमंतारंकुरूणामयशस्करं॥ ॥
सौतिरुवाच ॥इतिशप्त्वातिसंक्रुद्धःशृंगीपितरमभ्यगात्।आसीनंगोव्रजेतस्मिन्वहंतंशवपन्नगं।सतमाल
क्ष्यपितरंशृंगीस्कंधगतेनवै।शवेनभुजगेनासीद्भूयःक्रोधसमाकुलः।दुःखाच्चाश्रूणिमुमुचेपितरंचेदमब्रवी
त्।श्रुत्वेमांधर्षणांताततवतेनदुरात्मना।राज्ञापरिक्षिताकोपादशपंतमहंनृपं।यथार्हतिसएवोग्रंशापंकु
रुकुलाधमः।सप्तमेहनितंपापंतक्षकःपन्नगोत्तमः।वैवस्वतस्यसदनंनेतापरमदारुणं।तमब्रवीत्पिता
ब्रह्मंस्तथाकोपसमन्वितं॥ शमीकउ ॥नमेप्रियंकृतंतातनैषधर्मस्तपस्विनां।वयंतस्यनरेंद्रस्यविष
येनिवसामहे।न्यायतोरक्षितास्तेनतस्यपापंनरोचये।सर्वथावर्तमानस्यराज्ञाह्यस्मद्विधैःसदा।क्षंतव्यंपुत्र

धर्मो हि हतोहं तेन संशयः।यदि राजा न संरक्षेत्पीडा नः परमा भवेत्।न शक्नुयाम चरितुं धर्मं पुत्र यथासुखं।
रक्ष्यमाणा वयं तात राजभिर्धर्मदृष्टिभिः।चरामो विपुलं धर्मं तेषां भागोस्ति धर्मतः।सर्वथा वर्त्तमानस्य राज्ञः
क्षंतव्यमेव हि।परिक्षित्तु विशेषेण यथास्य प्रपितामहः।रक्षत्यस्मांस्तथा राज्ञा रक्षितव्याः प्रजा विभो।अ
राजके जनपदे दोषा जायंते वै सदा।उद्धतं सततं लोकं राजा दंडेन शास्ति वै।दंडात्प्रतिभयं भूयः शांतिरुत्प
द्यते तदा।नोद्विग्नश्चरते धर्मं नोद्विग्नश्चरते क्रियां।राज्ञा प्रवर्त्तितो धर्मो धर्मात्स्वर्गः प्रतिष्ठितः।राज्ञो यज्ञ
क्रियाः सर्वा यज्ञाद्देवाः प्रतिष्ठिताः।देवाद्वृष्टिः प्रवर्त्तेत वृष्टेरोषधयः स्मृताः।ओषधिभ्यो मनुष्याणां धा
रयेत्सततं हितं।मनुष्याणां च यो धाता राजा राज्यकरः पुनः।दशश्रोत्रियसमो राजा इत्येवं मनुरब्रवीत्।
तेनेह क्षुधितेनाद्य श्रांतेन च तपस्विना।अजानता कृतं मन्ये व्रतमेतदिदं मम।कस्मादिदं त्वया बाल्या
त्सहसा दुष्कृतं कृतं।न ह्यर्हति नृपः शापमस्मत्तः पुत्र सर्वथा इत्यादिपर्वण्यास्तीके
शृंग्युवाच यद्येतत्साहसं तात यदि वा दुष्कृतं कृतं।प्रियं वाप्यप्रियं वा ते वागुक्ता न मृषा भवेत्।ने
वान्यथेदं भविता पितरेष ब्रवीमि ते।नाहं मृषा ब्रवीम्येवं स्वैरेष्वपि कुतः शपन् शमीक उवाच

ज्ञानामुग्रप्रभावंत्वांतातसत्यगिरिंतथा।नानृतंचोक्तपूर्वंते नैतन्मिथ्याभविष्यति।पित्रापुत्रोवयस्थोपिस
ततंवाच्यएवतु।यथास्याद्गुणसंयुक्तःप्राप्नुयाच्चमहद्यशः।।किंपुनर्बालएवत्वंतपसाभावितःसदा।व
र्द्धतेचप्रभवतांकोपोतीवमहात्मनां।सोहंपश्यामिवक्तव्यंत्वयिधर्मभृतांवर।पुत्रत्वंबालतांचैवतथावे
क्ष्यचसाहसं।सत्वंशमपरोभूत्वावन्यमाहारमाचरन्।चरक्रोधमिमंहित्वानैवंधर्मंप्रहास्यसि।क्रोधो
हिधर्मंहरतियतीनांदुःखसंचितं।ततोधर्मविहीनानांगतिरिष्टानविद्यते।शमएवयतीनांहिक्षमिणां
सिद्धिकारकः।क्षमावतामयंलोकःपरश्चैवक्षमावतां।तस्माच्चरेथाःसततंक्षमाशीजितेंद्रियः।क्षमया
प्राप्स्यसेलोकान्ब्रह्मणःसमनंतरान्।मयातुशममास्थाययच्छक्यंकर्तुमद्यवै।तत्करिष्याम्यहंतातप्रे
षयिष्येनृपायवै।ममपुत्रेणशप्तोसिबालेनाकृतबुद्धिना।ममेमांधर्षणांत्वत्तःप्रेक्ष्यराजन्नमर्षिणा

सौतिरुवाच एवमादिश्यशिष्यंसप्रेषयामासुव्रतः।परिक्षितेनृपतयेदयापन्नोमहातपाः।संदिश्य
कुशलप्रश्नंकार्यवृत्तांतमेवच।शिष्यंगौरमुखंनामशीलवंतंसमाहितं।सोभिगम्यततःशीघ्रंनरेंद्रंकुरु
वर्द्धनं।विवेशभवनंराज्ञःपूर्वंद्वास्थैर्निवेदितः।पूजितस्तुनरेंद्रेणद्विजोगौरमुखस्तदा।आचख्यौचपरि